# राजसूयम् प्रबन्धम्

## मेल्प्पुत्तूर् नारायण भट्टतिरि

# Rājasūyam Prabandham

## Melputtūr Nārāyaṇa Bhaṭṭatiri

This text is based on

# राजसूयम् प्रबन्धम्
# मेल्प्पुत्तूर् नारायण भट्टतिरि

# Rājasūyam Prabandham
# Melputtūr Nārāyaṇa Bhaṭṭatiri

(With an old Malayalam Commentary)

Published by Dr. K. Raghavan Pillai, B.A. (Hons.), Ph. D. (London), Curator, Manuscripts Library, Trivandrum, 1134/1959. Kerala University Malayalam Series No. 100. Printed at Press Ramses, Trivandrum.

(Version in Devanagari lipi typed by A. Harindranath (2005-2006) using Devanāgarī for TEX Version 2.0)

# Introduction to Rājasūyam Prabandham

**Dr. K. Raghavan Pillai**
Curator, Manuscripts Library, Trivandrum

The *Prabandham* literature is a proper representative of the Kerala Sanskrit literature. *Prabandham* literature has a *keralite flavour* since it is related to *cākyār kūttu*. Due to the relation with *cākyār kūttu*, it is placed in the group of plays. It is to be remembered that *cākyārs* used plays as well for *kūttu*. It may be stated that, these are useful literary creations in a special way. India and Kerala have a tradition in which even works such as Rāmāyaṇa which are either in pure verse or prose form also became tools for the cultural growth of the society through recitals and discourses. The *Prabandhams* used in *cākyār kūttu*, which may be considered as a sort of visual art aimed at the society, deserve a special place in this tradition. Since the poet needs to compose the poem, considering the listener, the majority of our *Prabandhams* do have a special quality and clarity. Since the *cākyār* has to perform in front of the audience the same plot which is enacted in a play by many actors using costumes and make up, without these supports, only using spoken word, expressions and signs, the author of the *Prabandham* has to pay special attention to impart quality, strength and dramatization to the composition.

It seems that Melputtūr Nārāyaṇa Bhaṭṭatiri, poet, devotee and scholar, has to be rendered first among the composers of *Prabandham*. Bhaṭṭatiri composed Sanskrit *Prabandhams* as requested by his dear friend Kuṭṭañceri Iravi Cākyār. There is a saying about the number of *Prabandhams* composed by Bhaṭṭatiri. The famous saying *Paṭṭeri (Bhaṭṭatiri) Prabandhams are ten* may not be based on facts. The saying may be implying that ten *Prabandhams* of Bhaṭṭatiri are more famous than others. Uḷḷūr opines that (1) it can be stated without doubt that the twenty *Prabandhams*,

1. *Rājasūyam*
2. *Dūtavākyam*
3. *Pāñcālī Svayamvaram*
4. *Nāḷāyaṇī caritam*
5. *Sundopasundopākhyānam*
6. *Subhadrāharaṇam*
7. *Kaunteyāṣṭakam*
8. *Kirātam*
9. *Kailasavarṇanam*
10. *Matsyāvatāram*

11. *Nṛgamokṣam*
12. *Niranunāsikam* or *Śūrpaṇakhāpralāpam*
13. *Rākṣasotpatti*
14. *Ahalyāmokṣam*
15. *Bālakāṇḍam*
16. *Dakṣayajñam*
17. *Tripuradahanam*
18. *Aṣṭami Campu*
19. *Svāhā Sudhākaram* and
20. *Koṭiviraham*

are composed by Bhaṭṭatiri. Vaṭakkumkūr Rāja Rāja Varma opines that Bhaṭṭatiri has composed more than thirty campus. In Vaṭakkumkūr's opinion (2),

1. *Rājasūyam*
2. *Gajendramokṣam*
3. *Nāradamohanam*
4. *Subhadrāharaṇam*
5. *Niranunāsikam*
6. *Aṣṭami Prabandham*
7. *Pāñcālī Svayamvaram*
8. *Bhagavaddūtu*
9. *Matsyāvatāram*
10. *Bhīṣma Svargati*
11. *Pārvatī Svayamvaram*
12. *Dakṣa Yāgam*
13. *Nṛgamokṣam*
14. *Svāhā Sudhākaram*

15. *Kalyāṇa Saugandhikam*
16. *Syamantakam*
17. *Pañcendropākhyānam*
18. *Santānagopālam*
19. *Tripuradahanam*
20. *Kucelavṛttam* and
21. *Rukmāṅgada caritam*

are some of the important *Prabandhams* composed by Bhaṭṭatiri. In any case, at this stage, it may be only stated that *Rājasūyam Prabandham* need not be considered in the argument about the *Prabandhams* composed by Bhaṭṭatiri.

There is a story about the reason for Bhaṭṭatiri's composition of *Rājasūyam Prabandham*. The story is that, this work which describes the Rājasūya yāga of Dharmaputra was composed as a reply to the ridicule by *Nampūtiri*s expert in the vedic rituals that, Bhaṭṭatiri's knowledge was less in topics related to *śrauta*. It is not known whether this story is true or false. If it is true, let us say thanks again to it for prompting Bhaṭṭatiri to compose *Rājasūyam Prabandham* of this nature activating that famous pride of knowledge and the tendency to mock at others, which imparted energy and direction to work to many others like Eḻuttacchan. We wonder whether how many of them would be able to compose a poem of exemplary beauty about the vedic ritual of Rājasūya which is known by rot by the ritualists and in which they hold the responsibility of conduction. Bhaṭṭatiri has composed an excellent *Prabandham* treating the act of Rājasūya as per the ordained style.

An important fact which strikes our mind deeply whenever we read Bhaṭṭatiri's compositions is his wonderful control power on words. This poet magician's style is to attract words using creative power and make them dance. Just like other compositions, *Rājasūyam Prabandham* also declares that he was not a poet fisherman who composed poems with dead words, picking up each word with tremendous effort by diving into the sea of sweat. The verses and prose portions supporting this opinion can be seen on any page of *Rājasūyam Prabandham*. Hence special examples are not cited.

The expertise of the poet in using ornamental phrases is also seen in this composition. But the ornamental phrases such as simili and *rūpakam* are used rarely. The poet has mostly used *virodhābhāsam* arising out of *śleṣa* in the field of ornamental phrases in *Rājasūyam Prabandham*. These are relevant in this work, in which wordly duels, ridicules and contemptual praises are to be necessarily used mostly. In the context where Śiśupāla abuses Śrīkṛṣṇa, we can observe the contemptual praises and contempts ending as praises. See how expertly the poet has handled the contemptual words in verse 93 (*Māyāmātrād*). Here we have to remember the fact that the words used by Śiśupāla should end in praise of Śrīkṛṣṇa is necessary for both Śiśupāla, who was a servant of Viṣṇu in his former birth and who is moving towards the attainment of Viṣṇu again through hatred, and Bhaṭṭatiri, the best among Kṛṣṇa devotees.

The scene where Śiśupāla abuses Bhīṣma gives the proof of Bhaṭṭatiri's ability to use words of sharp good humour, verse 112 (*ṣaṇḍatvād*). Observe the flavour of humour in the poem. Even though Melputtūr Nārāyaṇa Bhaṭṭatiri was not a mere scholar poet, he was a poet who was a scholar as well. In *Rājasūyam Prabandham*, the scholarship of the poet stands behind the poetics, gracefully out of the way. Even then, covering its face, that scholarship peeps out occasionally. The poet states how the wife of Pāṇḍavas and the virtuous Pārṣati came to experience *kuśabda* in verse 49 thus: *kuśai pavam ....* The poet's skill as a grammarian casts a shadow in the verse 27.

To the question, which talent of Nārāyaṇa Bhaṭṭatiri who is famous as an academician, scholar, devotee and poet is predominant in *Rājasūyam Prabandham*, I think the devotee and poet excel the other aspects. While describing Śrīkṛṣṇa, who is honoured by *Agrya Pūja* in Rājasūyam, through Bhīṣma's words, the poet has used highly devotional verses and prose. Here, I only draw the reader's attention to the description of Kṛiṣṇa's avatars by the grand old sire Bhīṣma, when Śiśupāla abuses Kṛṣṇa (verses 103 to 117). At the end of the description dealing with the power of Kṛiṣṇa, the poet himself states that *murārirapi harṣavikārāvegādātmastutistviti nigūhya kathañcidastād.*

The time of Melputtūr is almost certain. He was born in M. E 785 (A. D. 1560) in Ponnani Taluk, Kurumpattur amśam, in the *illam* (house) of Melputtūr which is sanskritised as *uparinavagrāmam* by Melputtūr (3) himself. The legend says that his mother's house was Payyūr *illam.* It is considered that he died in M. E. 823 (A. D. 1648). Another opinion is that he died in M. E. 841 (A. D. 1666 ). This does not appear to be logical. Even though there is no impossibility of living up to the age of 106, it is doubtful, whether he can compose a work, *Śrīpādasaptati* at the age of 106. There is also a legend that during his last years, he lived worshipping the Goddess of Mukkolakkal, composed *Śrīpādasaptati* praising the Goddess and he did not live for long thereafter.

Along with the *Rājasūyam Prabandham* which is being published currently as the 100th book of the Malayalam series, a Malayalam commentary is also included which appears to be ancient. We have only one manuscript copy of this commentary. We do not know who the author is. Right at the beginning of the commentary, it is stated that *Kulaśekhara bhūpateh prītaye Rājasūyākhya kāvyam vyākhyāyate mama.* If the opinion that the reign of Kulaśekhara was during A.D. 800 to 1102 (4) is right, who may be this Kulaśekhara mentioned by the commentator of Nārāyaṇa Bhaṭṭatiri who lived after A. D. 1560?. There is also an opinion (5) that the person who modernized kūttu is Kulaśekhara Perumāḷ, the founder of second Cera empire. If that is so, this Kulaśekhara may have been ordained as the preceptor of *kūttu.* It may be that the commentator, who wrote a Malayalam commentary for *Rājasūyam Prabandam*, which can be used in *cākyār kūttu* which was composed for a famous *cākyār* for using in a *kūttu* may have mentioned Kulaśekhara as the preceptor with special relevance. Or the commentator may have mentioned a sponsor king having a title of Kulaśekhara. In any case, now, while printing and publishing a good ancient Malayalam commentary, we have no course other than being silent about its author.

The research officers Sri M. Madhavan Pillai, Sri N. Raghavan Nair and assistant research officer Sri S. Mualidharan Nair have assisted me in the publication of this book. I am indebted to them and the owners of Press Ramses who completed the printing correctly.

K. Raghavan Pillai, Curator
Thiruvananthapuram, 12-05-1959

(1) Kerala Sahitya Charitram, Volume 2, page 357.
(2) Sahityacharitram Prasthanangalilute, published by N.B.S., page 493.
(3) Towards the end of *Prakriyāsarvasvam*, in the verse starting with *bhūkhaṇḍe keralākhye saritamiha niḷāmuttarenaiva nāvākṣetrāt gāvūtimātre punaruparinavagrāmanāmni* ... .
(4) Elamkulam Kunhan Pillai, Keralacharithrathile irulatanja etukal, chila kerala charithra prasnangal, part 2.
(5) Sahityacharitram Prasthanangalilute, published by N.B.S., Page 705.

*Translated by A. Purushothaman, 2006.*

गोविन्दमानन्दरसैकसान्द्र-
मावन्द्य नारायणभूसुरेन्द्रः
निर्माति धर्मात्मजराजसूय-
सम्पन्मयं संप्रति चम्पुकाव्यम्  ॥ १ ॥

कामं भीमार्ज्जुनाद्यैरजितपृथुमहोवर्द्धितैरुद्धतानाम्
पृथ्वीशानां जयेन प्रसभमुपहृते निस्तुले वित्तराशौ
तद्वृत्तं धर्म्मसूनुः सपदि परममित्राय भर्त्रे यदूनाम्
आवेद्य व्यासमुख्यैः सममभृत परद्रव्यवद् द्रव्यभारम्
॥ २ ॥

गद्यं ॥ १ ॥

भगवानपि भुवनानुग्रहैकदीक्षितः सततवीक्षितसकल-
वृत्तान्तोऽपि तदुदन्तनिशमनानन्तरमेव निखिलात्मकस्य
स्वस्यैव वरिवस्याहेतोरधिकदुस्साधस्य समस्तामर
मुनिमनुजस्तोमसंप्रीतिसंभावनीयस्य सप्ततन्तुप्रवरस्य
संसाधनमिषेण तत इतः समामिळितबहुतरसुकृतो-
त्तरजननयनहृदयेषु चिदानन्दामृतलहरीं विकरीतु-
मनाः सकलहरिदन्तसन्ततां विभूतिमुपसंहृत्यपाण्डव-
पुरमेव मण्डयन्तीं महालक्ष्मीं वासकसज्जिकामिवाभि-
सर्त्तुकामस्तथाविधमहोत्सवसमुचितवेषभूषादेदीप्य-
मानयदुनृपसुतपृतनाशतावृत सपरिकरसकलमहिषी-
गणपरिवीयमाणः सुरपुरदुर्ल्लभनिजलक्ष्मीहल्लोहलतुल्य
विभवं पृथुतर पृथासुतप्रणयभारसमुचितमतुलमणिगण-

बहुलं अतिविविधमुपदापदार्थसार्थमुद्वाहयन् कुश-
स्तलीपुरस्थलादभिप्रस्थाय हरिप्रस्थनगरीं अभूतपूर्व-
परमाढंबरोचितवादित्रादिघोष संपदाकन्पितभुवना-
वकाशः समाससाद ।

कुतूहलसमाकुलैस्तदनु शुश्रुवे पाण्डवै-
श्चिराय परिवाञ्चितः स खलु पाञ्चजन्यद्ध्वनिः
मुरारिसुषमाझरीममृतपायमापास्यतां
विरोधि दुरितं नृणां पुरत एव धून्वन्निव ॥ ३ ॥

गद्यं ॥ २ ॥

तदाच दरोदरोदिर्ण्णपुरोदरापूर्ण्ण गभीरमधुरनिनादविचा-
लितकूलंकषकुतूहलाकलितहृदन्तरैः निरन्तरमधिरूढ-
सौधांकणतुंगगोपुरसालैः पुरीगतनरपुरन्ध्री-
जालैरापादचूडमापीयमानतापिञ्छमञ्जरीमञ्जुळकान्ति
पीयूषभूमा चामीकरश्यामीकरणनिपुणसुषमाभरसुषमांग
भंगितरंगिताभिः आमञ्जुळमणिशिबिकासमारूढाभिः
षोडशसहस्राधिकवल्लभाभिरुल्लसितोपशल्यः चटुल तटि-
ल्लतापरीत इव तरुणांबुवाहः कनकलतिकानिकर-
परिगत इव सुरलोकशाखी विपुलबलकदंबाडंबर-
विजृंभितरेणुनिकुरुंबसंबाधनिपीतांबरः पीतां-
बरः पाण्डवहृदयमिव विशालसुभगतरं नगरप्रवरं
प्रविवेश ।

गद्यं ॥ ३ ॥

तत्र च वर्त्तमाने मर्त्योत्तमवेषस्य नित्येश्वरस्य तत्तादृशमत्तकाशिनी रत्नैः समं प्रत्यासीदतः प्रत्यग्र दर्शनमहोत्सवे-

चित्रम् ! भो ! रूपमासां बत पुनरमुनासंगमे भाग्यसीमा
सर्वागारेष्वजस्रं खलु रतिजनको हन्त सौभाग्यभूमा
पश्येमाः पश्य शौरिं शिव शिव भुवनानन्दनं कान्तिसीम्ना
दिष्ट्या दृष्टोरवाप्तं फलमिति सुदृशाम् प्रोद्गता वाग्विलासाः
॥ ४ ॥

आसामेकापि नाकारिषि बत किमहं भाग्यपात्रं विधात्रा
हा ! हन्तैतत् पदाब्जद्वयमपि कुचयोरेकदा योजयेयम्
स्वप्नेऽप्येनं कदा वा दृढतरमुपगूहामि हा मे दुराशां
कृष्णस्यापीय रूपामृतमिति महिळामोहमाहन्त याताः
॥ ५ ॥

गद्यं ॥ ४ ॥ ततश्च संभ्रमप्रमोदताण्ढवित हृदयैः पाण्ढवेयैः व्यासधौम्यपुरोगैः समभिगम्य सम्मानपूर्वकं पुराभ्य-न्तरमुपनीते समस्त हरित्तटाहृतप्राभृतप्रकरपरिहा-सिनमिव मुक्तामणिप्रचुरं वित्तराशिं दत्तवति विलस-दष्टापदविष्टरनिविष्टे विष्टरश्रवसि परिहृष्टपार्षती-माधवीसाधुतरमाननसमानन्दितासु विशालमणिशाला-शतनिवेशितासु स्वपुरीनिवासादपि प्रसेदुषीषु परम-पुरुषमहिषीषु यथासुखनिवेशितासु च यदुपृतनासु ।

असूर्यमिव सूर्येण निवातमिव वायुणा
अतोयमिव वर्षेण हरिणा तत्पुरं बभौ ॥ ६ ॥

सुखोपविष्टं भुवनप्रकृष्टम्
पुमाम्समेत्य स्वजनाऽभिजुष्टः
नृपो निविष्टोऽस्य पदाब्जमूले
स्वयम् गरिष्टां गिरमाभभाषे ॥ ७ ॥

वित्तम् देव भवत् कृपार्ज्जितमिदम् कृत्स्नं त्वयि प्रार्प्पितम्
युक्तं तद्विनियुज्यतां तव कलारूपेषु देवदिषु
कर्त्तव्येषु नियुङ्क्ष्व भृत्यमयि मां द्रष्टासि सर्वं प्रभो
कर्त्ता कारयिता प्रसीदसि फलं दत्से च निस्संशयम्
॥ ८ ॥

उक्तवन्तमिति भक्तवत्सलः
श्रावयन्नथ सभासदो जनान्
व्याजहार दशनाम्शुमण्ढल-
वाजहारशबळीकृताकृतिः ॥ ९ ॥

धर्मात्मन् भवता जिता त्वयि परं जागर्त्तु लक्ष्मीरियम्
त्वां कर्त्तारमुपेत्य सोऽद्य लसतु श्रीराजसूयाद्ध्वरः
मामाज्ञाकरमेव ते विजयवद् विज्ञाय यज्ञोद्यमम्
कुर्वीथास्त्वमदृष्टपूर्वविधया तं साधयिष्याम्यहम्
॥ १० ॥

इत्थं वादिनि विश्वनेतरि भृशं पार्त्थः कृतार्त्थीकृतः

तद्वाचा प्रजिघाय भूसुरनृपव्रातेषुदूतोत्करान्
प्राप्तानामिह सार्द्धवत्सरसुखावासक्षमानालयान्
क्षिप्रं कल्पयितुं च शिल्पिनिवहानल्पेतरानभ्यधात् ॥ ११ ॥

तद्वचः श्रवणसत्वरोद्यत-
क्षिप्रकारि बहुशिल्पिवैभवात्
निष्ठितैव ददृशे गृहावली
विष्टपाळिरिव विष्णुवैभवात् ॥ १२ ॥

संप्राप्तो नकुलोऽथ हस्तिनपुरिं प्रज्ञादृशं तं नृपम्
भीष्मद्रोणकृपादिकान् प्रमुदितान् कर्णान्वितान् कौरवान्
सर्वानादरपूर्वमानयदसौ राजापि सम्मानय-
न्नेनानेधितसाधुभोगविभवेष्वावासयद्धामसु ॥ १३ ॥

वृष्णीन्द्राश्च बलोग्रसेनवसुदेवाग्र्याः समग्रादराः
संप्राप्ताः शिशुपालपौण्ड्रकमुखाश्चान्येऽपि मान्या नृपाः
पूर्वप्राप्तविराटपार्षतमुखैः भूपैन चात्यादृताः
तेऽपि स्वोचितवैभवानि भवनान्यापुश्चमूभिर्वृताः ॥ १४ ॥

ये भूपा बन्दमुक्ता मगधनृपगृहात् तेऽपि कृष्णांघ्रिभक्ति-
स्फायानूत्थायि पार्थप्रणयपरवशाः स्वस्वराज्याप्तिहृष्टाः
भूषा वेषैरपूर्वां तनुमिवदधतो वाहयन्तो धनौघान्
आपुः पादाग्रजाग्रन्निगळकिणकिणैः तत्क्षणे लक्ष्यभेदाः
॥ १५ ॥

सर्वे निर्वैरगर्वा विविधपरिकराखर्वमुर्वीशमुख्याः
सस्त्रीपुत्राः सशस्त्रोज्ज्वलविपुलबलाः दूतहूताः समेताः
धर्मात्मा धर्मजन्मा मदुपहृतधनेनैव तं यज्ञवर्यम्
सर्वं निर्वोढुमीष्टामिति च विचकृषुः स्पर्द्धया वित्तभारान्
॥ १६ ॥

पाण्ड्यः पाटीरकूटान् मरिचपुरुचयान् केरळोऽवन्तिराजो
लक्षं योषाश्च भूषाः सुभितमनिमहः कन्दळाः कुन्तलेशः
काशीशोऽशीतिसाहस्रकमदितगवां कीकटेशश्चकोटिम्
चीनेशः पट्टबन्धान् गजरथतुरगान् भूरि सौवीरवीरः
॥ १७ ॥

कांबोजः कंबळौघान् मृगमदघनसारादि बाण्डानि पौण्ड्रो
वङ्गः पर्यङ्कवर्यान् नियुतमथ कलिंगोऽपि भृंगारसंघान्
सौराष्ट्रो भारलक्षं धवळ गुळसिताः शैलजास्तैलकुम्भान्
कोटिम्मारन्दकुंभानयुतमपि घृतं कुंभकोट्या च नन्दः
॥ १८ ॥

हेतिव्रातान् शकौघैः सह स हि भगदत्तोऽहरन्माळवेन्द्रो
गोधूमद्रोणकोटिम् सममगरुघटाजातितक्कोलभारैः
सर्वेऽपि स्वर्णरत्नान्युरुतरमहरन् द्वारतो वारिताश्च
कृच्छ्रात् प्रापुः प्रवेशं कथितनिजनिजप्राभृता भूभृतोऽमी
॥ १९ ॥

केऽपि स्फायद्धनायाः कतिचितदिरसप्राज्यसाज्योदिभोज्य-
स्वाराज्याशाः परे तु स्फुटयितु मनसो यज्ञविज्ञानदाक्ष्यम्

केचिद् गोविन्दसन्दर्शनविवशधियः केऽपि विद्वद्वितण्ढा-
रक्ता विप्राः समीयुर्विविधगुणकदंबावलंबाः कुटुंबैः ॥ २० ॥

गद्यं ॥ ५ ॥

ततश्च दिदृक्षाबुभुक्षाधनजिघृक्षदिरसान्धहृदन्त
चतुरन्त पर्यन्त धरान्तराळ मुहुर्मुहुरापतयालु
सबालवृद्धसर्वचातुर्वर्ण्यजनपरिपूर्णे
नगरदेशे हविर्जिघृक्षात्भुतदिदृक्षासमाक्षिप्तहृदय
सर्वगीर्वाण गन्धर्वसिद्धचारणनागयक्षरक्षो-
गणनिरवकाशे चोपरिदेशे तद्विमर्द्दपरिहरणायेव
गगनाङ्कणात् नगर-भुवमवतीर्णेषु
भूरिधामसु नारदादिमुनिषु ततो परमहर्षिषु
च परमहर्षिषु सशिष्यनिवहेष्वप्यशिष्य
महिमसु सदारकेष्वप्यम् हसां विदारकेषु समागतेषु
चतुर्दशभुवनगतजनधननिखिलपदार्त्थसार्त्थनिर्भर
गर्भतया पद्मनाभकुक्षिरिव लक्ष्यते स्म
यक्ष्यमाणस्य नृपतेर्न्नगरी ।

नेमुर्भूमिभृतो नृपं भृतधनाः भूपोऽनमद् भूसुरान्
द्रष्टुं सम्मिळिता जनाः समनमन् भूपं द्विजान् भूपतीन्
प्राप्तान् प्राक्तन नारदादिकमुनिस्तोमान् प्रणेमुः समम्
भूपो भूमिभुजो द्विजाश्च जनताः ते नेमुरेकं हरिम् ॥ २१ ॥

हन्तानन्तं दिगन्तान्मिळितमुरुविधं वीक्ष्य भूपालचक्रम्

स्मृत्वान्तः पार्त्थवश्यम् क्षितितलमखिलं कौरवः प्राप तापम्
एतावान् भूमिभारः स्थित इति मतवान् माधवो नारदोऽपि
त्वेतावत्सारशेषैः कुरुरणमनुसञ्चित्य रोमाञ्चितोऽभूत्
॥ २२ ॥

गद्यं ६

तत्र च निखिलमहीपतिमहीसुरमहाजन-
मुनिसभाजन सभाजननियुक्तसमस्तकार्यभरसह
सहदेवसमनुचोदितामात्यभृत्यादि
सर्वधूर्वहजन पूर्वतर संभृतसंभावना
संभार संभरितेषु जंभरिपुनिलयतुलितेषु भवनेषु
निजनिज भवनीयन्त एव निषीदन्तः प्रमोदन्ते स्म
दशदिगन्तसमागन्तवो जन्तवः ।

गद्यं ॥ ७ ॥ तावदेव च प्रत्यासन्ने राजसूयारंभोचिते
फाल्गुनमासे सकलयज्ञसंभारमुख्यतमकल्प
समुत्पादनधृतप्रयत्नेषु मुनिप्रवरेषु स्वनिरूपित
प्रकृष्टतरोपतेष्टीयमानभूयिष्ट
तरेष्टकानिचय पट्टवसन पुष्टतर
पशुकुलकृष्णरुरुवलीवर्द्द शार्द्दूलाजिन
मधुसर्प्पिस्सोमवल्लीमतल्लीपरस्सहस्र
हैममाणिक्यवार्क्षमार्त्तिकादिपात्रिका
विशेष परिप्रीतहृदयेषु निरस्तदोष पुरस्तोय
शुंभदुदक्प्रवणप्रवरदेवयजनप्रदेशे
प्रथिष्ठ कौशलं प्रतिष्ठापित

प्रायासु च यज्ञशालासु समुचितसमये
सानुजमित्रेण पार्त्थिवेन सार्द्धमासितः शासिता
भुवनत्रयस्य वासुदेवः सकलमहाजनसमाजप्रथित-
प्रभायां सभायां एवमभाषिष्ट ।

सर्वे भोः संशृणुद्ध्वं ननु समुपनता भूपतेर्यज्ञदीक्षा
श्वस्तु प्रारीप्सतेऽसौ तदुचितविभवामुत्सवाघोषलक्ष्मीम्
संप्राप्तानन्तजन्तुप्रकरसकलकामार्पणासाद्ध्यवृत्तौ
तस्यां तु स्वस्वशक्त्या सहकृतिरखिलैः गृह्यतां भूमिपालैः
॥ २३ ॥

मा च शंकिषत मानवा मनाक्
प्रत्यवायमिह यस्तितांसते
तस्य नेष्यति वपुः कबन्धताम्
बन्धुरेष जगतः सुदर्शनः ॥ २४ ॥

गद्यं ॥ ८ ॥

इत्यभिहिते च विश्वजनसुश्ळाघ्यभाग्यातिशय
विराजमान महाराजप्रमोदपूरणैकपुमर्त्थ-
समर्त्थनसमुत्थायुकैः विमुक्ताभिमानैः
समस्तधरित्रीपतिभिः परितः परितोष-
समनूदिते यादवेन्द्रवचने नृपतिरपि पृथक्
पृथक् प्रधानकृत्येषु तत्तदुचितानुत्तम-
पटिम्नो जनान् इत्थमनुशशास ।

सूदाद्ध्यक्षोऽस्तु भीमः स च चतुरमतिः सज्जतां सज्जनानाम्
शुश्रूषायां किरीटी नकुल इह च संसाधने साधनानाम्
पूजाकृत्यै यथार्हम् प्रसजतु सहदेवोऽपि वित्तौघगुप्तौ
यत्तो दुर्योधनः स्याद्वहतु वितरणे निर्ण्यम् कर्ण एव
॥ २५ ॥

आस्तां व्यञ्जनपुञ्जसाधनसमादित्सुर्युयुत्सुः सदा
द्रौणिर्द्दानकृतौ रतोऽस्तु विदुरः प्रेक्षेत सूक्ष्मव्ययान्
भूपान् रञ्जय सञ्जयाचर मम प्रीत्यै सदा सात्यके
सर्वान् किं पृथगालपामि सकलैर्न्निर्वाह्यतामध्वरः
॥ २६ ॥

गद्यं ॥ ९ ॥

इत्यभिधाय तत्समयोचित मनोनुकूल
विभूषणादि पदार्त्थैर्विशेषतः
कर्मोन्मुखानां सम्मानकर्म्म
निर्म्मायमेव निर्म्माय धर्मात्मजन्मनि
निवृत्ते प्रवृत्ते च तदुत्तरवासरे
समस्तैरपि प्रधाननियुक्तैरितरैश्च
निजनिजगुणोचित तत्तदधिकारग्रहेण
जातत्वरैः प्रातस्तरामातस्तरे
पाकादिशाला ।

गद्यं ॥ १० ॥

वितेनिरे च वृकोदरप्रचोदितैः
पाकचातुरीभरादरातिशयमेदुरैः सूदराशिभिः

धनञ्जयसंगर प्रसंग शंकरोपदीकृत
कैलासशैलतुंगशृंग सम्घ शंकाकराः
नयन प्रमोदनाः महौदनराशयः ।

गुणैर् गुणाढ्यैः सुगुणात्मकः कृतो-
ऽप्यतीव मुख्योऽजनि भोज्य सञ्चयः
कृतोऽपि स व्यञ्जनसन्धिकोविदैर्-
बभार साधु स्वरसंहितोदयम् ॥ २७ ॥

सुपाचकैः[1] पावकरूढपात्रिका-
चलाचलस्वाग्रकरैश्चराचरैः
मिथोऽतिसम्यग्रचनावदावदैः
जना रसांबोधिपता पताः कृताः ॥ २८ ॥

गद्यं ॥ ११ ॥

तत्र च पाकशासनप्रणिहितहृदय
फल्गुनाग्रजप्रीत्यागोत्रारिणा प्रेरितैरिवामृत-
सारपारिजात मकरन्दादिभिः निर्व्यूढेषु
सर्वपात्रीणेषु विविध भर्ज्जन निर्ज्जिहान
परिमळासज्जित निखिल नासिकारञ्जनेषु
व्यञ्जनेषु व्यञ्जितोत्साहमहमहमिकया
महीपतीष्वेव तत्तत् कार्यसमुद्धुरेषु
अञ्जसा कृताभ्यञ्जनमहानन्दिनि मिहिर-

[1]Variant text: सुपापचैः

नन्दिनीविहितमहितस्नाने मानुषजाले
नीलच्छायदृश्यमान गगनवितानआवरोपणेनेव
विरचितायां विस्तीर्ण्णतर भुक्तिशालायां
अत्यादरमुपहूते यथोचित पादावनेजनादि
पूर्वतर विस्तीर्ण्ण हिमांबुकीर्ण्ण
दिव्यांगरागमाल्यतल्लज घूर्णमान
सुगन्धपूर्ण दिगन्तराळे तरुणतरणिमण्डल-
लक्षसदृक्षकाञ्चन भाजनाञ्जितासु
पङ्क्तिषु मणिपीठिकागणसुनिविष्टे
परिहृष्टे परिमृष्टवेष धृष्टद्युम्ना-
द्यनुद्रुत द्रुपदराजसपरितोषपरिगृहीत
परिवेषणकृत्यं प्रमुदित भीष्मद्रोणादि
समवेक्ष्यमाणं यादवकुलमिव मद्गुराज्य
संगविवर्द्धितं वर्षोपवनमिव सज्जातिका-
दळजनितामोदं शिशिरजृंभितमिव परिबृंहित
भृहतिकाग्रहणरसम् रसिकसभान्तरमिव सरसवार्त्ताक-
विकृतिविलोभनीयं समुद्रोदरमिव बहुरसरुचिमद्-
गुळसिताभोगं समुज्ज्वलान्नमय तारकापुञ्ज रागातिरेका-
पतितराकेन्दुबिंबकदंब बिंबोकधरसितोज्ज्वलपर्प्पट-
प्रकर तर्प्पितनयन रसनं विविधखाद्यपेयलेह्यादि-
तेमनगणामृतरसाभिगामिस्वादिमसीमाकामाधिकास्वाधनकणेघात-
समयसमालिह्यमानकटुकाम्ळरसनिष्ठानपुष्टानन्दभर-
व्यतिकरविवशतया विनिन्द्यमान मधुररसमात्र धृताश-

सुधाशनकलचरितं निखिलजनघृतस्यामधुस्यादधिस्यादि
परिपूरण भूरिपरिश्राम्यदाराळिकपाळिकासमाकुलं
अश्नीत पिबतखादतमोददततृप्यत प्यतमत्भुततर-
मभ्यवहारचरित्रमवर्त्तिष्ट ।

आगच्छन्त्वधिभुक्तिशालमशनायन्तो दिगन्तागताः
किं दध्यस्यथ किं घृतस्यथ किमु क्षीरस्यथ क्ष्मासुराः
इत्थं खादततृप्यतासुचतुरे सूदोत्करे पृच्छति
स्त्यायत्तेमन चारुजेमनभरं ते बोभुजाञ्चक्रिरे ॥ २९ ॥

भूपास्त्विन्धनबन्धनाहृतिजनस्कन्धानयस्नापना
गन्धोन्मर्दन मार्जनोक्षणसुगन्धासेकवासोर्पणैः
पङ्क्यारोपण तालवृन्त जलदानोच्छिष्टहानोल्लळ-
च्छयासंसरणादिकैरपि मुदामभ्येयुरल्पेतराम्
॥ ३० ॥

तत्तादृशाशनरसावसितौ विराज-
च्छय्यासनादिजुषि दिव्यसभादिदेशे
तांबूल्यमाल्यमुखभोगविनोदयोगैर्-
मिश्रे विशश्रमुरपश्रममेव सर्वे ॥ ३१॥

हैमी सर्वा गृहाळी कनकविरचिताः तोरणाः तारकल्पाः
स्वल्पं वा भूरिखारीमितमपि कळधौतोत्थमेवात्र पात्रम्
शय्याः कौशेयमय्यः कनकविरचिताः खट्विका नादुकूलम्

नारत्नं नाप्यहैमं कुहचन ददृशे तत्पुरे वस्तुजालम्
॥ ३२ ॥

एवं प्रत्यहमेव तत्र सुमहारंभे महे प्रस्तुते
सर्वैरेव धुरन्धरैः प्रववृते वीतप्रमादश्रमैः
भीष्मद्रोणमुखाः कृताकृत समीक्षादीनकार्षुः स्वयम्
ये त्वन्ये धृतराष्ट्रबाल्हिकमुखास्ते स्वामिवद्रेमिरे ॥ ३३॥

गद्यं ॥ १२ ॥

एवं प्रवर्त्तमाने प्रवृद्धतरे समस्तनरप्रमोदे सुरप्रमोदकरणे विधृतत्वर इव द्रुततरमवततार फाल्गुनमासः ।

दुःसाधदिग्जयात्पूर्वं यज्नोपक्रम साधकः
फाल्गुनोऽभूद् भुजोल्लासो मासस्त्वजनि साम्प्रतम्॥ ३४ ॥

षड्भिस्तु सोमयजनैरभिषेचनीय-
घुष्टैस्तथा द्विपशुनेष्टिशतैः प्रधानैः
सर्वैः सहैक इह राजति राजसूयो
यः सार्द्धसप्तदशमाससमापनीयः ॥ ३५ ॥

शाला तावन्महीभृत्पदविमितमहा प्रक्रमोत्थप्रमाणा
प्राग्वंशोद्यत्सदोमण्डपमहितहविर्धानशालाविशाला-
मार्जालीयान्वितागनीध्रकपरिलसिता शंकुसंकीलितोर्व्या[2]

[2]Variant text: शंकुसंकीर्णितोर्व्या

कल्पं शिल्पं च बुद्धा व्यरचि बहुमणिस्तम्भहेमच्छदाङ्का
॥ ३६ ॥

कार्याणि बन्धुषु निवेश्य स फाल्गुनाख्य-
मासादिमप्रतिपदि क्षितपालमौलिः
दर्शेष्टिमाशु विनिवर्त्य कृतातितुंग-
मंगल्य दानविभवो विततान दीक्षाम् ॥ ३७ ॥

तत्राग्निचित्यासंयोगादुखासंभृतिमाचरन्
वायव्य पशुना चेष्ट्वा नान्द्यादीनुपचक्रमे ॥ ३८ ॥

स भिष्ममुख्यानभिवाद्यपूर्वं
रक्षादिकृत्ये हरिमेव वव्रे
धौम्यप्रधानानपि याजकत्वे
तथार्त्विजीनान् परिकर्मकर्मान् ॥ ३९ ॥

स्नानाद्यैः शुद्धवर्ष्मा सहनृपसुतया राजसूयेन यक्ष्ये
सोऽहं स्वाराज्यकामस्त्ववितिफलमुपसङ्कल्प्य कृष्णार्पितात्मा
अद्धर्युब्रह्ममुख्यैष्वकुरुत वरणं श्लाघ्यमर्घ्यादिपूर्वं
सर्वे सर्वंकषा अप्युचितगुणवशादृत्विगाद्याः विभक्ताः
॥ ४० ॥

अद्धर्युर्याज्ञवल्क्यः शतपथविदृचां पारगः[3] पैलनामा
होतोद्गाता सुषामा निखिलविदभवद् ब्रह्मभूतश्च रैभ्यः

[3]Variant text: पालकः

एषां पुत्राश्च शिष्या निजनिजसयुजामृत्विजां कृत्यमापुः
सादस्यं प्राप पाराशरमुनिवृषभो नारदाद्यैरुपेतः
॥ ४१ ॥

आरोप्याग्नीनरण्योर्नृपतिरथ वधूबन्धुर्क्षर्त्विक्परीतः
तत्तत् संभारशुंभत्करमणिगुणभृङ्गसुराळी पुरोगः
सर्वोर्वीपालपाळीनिबिधितसरणिर्भूरिवादित्रघोषः
श्वेतच्छत्रादिशोभी मणिकनकमयीं प्राविशद् यज्ञशालाम्
॥ ४२ ॥

गद्यं ॥ १३ ॥

तत्र च सकलमुनिनृपविद्वज्जनयथोचिताधिरूढ-
मणिपीठे यज्ञवाटे मुनिजनानुगतधौम्यानुस्मारित-
क्रमादग्नीन् निधाय यथाक्रमविहितत्रिहविष्क-
दीक्षणीयेष्ट्यवधिविधृत मृगाजिन मेखलोष्णीष
दण्डादिदीक्षित चिह्नपरिचिह्नितोविहितोखाधारणो
राजसूयप्रारंभरूपं त्रिदिनदीक्षं त्रिदिन-
विहितप्रवर्ग्योपसदं साग्निचयन सप्तमदिन-
क्लृप्तसुत्याविधानं पवित्राख्यमग्निष्टोमं
प्राक्रमिष्ट ।

स्वाख्यन् मन्त्रान् क्रियाळिंनिपुणमतनिषुः सोममक्रैषुरिष्टी-
श्चादिष्टाश्चानुतष्ठुस्त्रिभिरपि दिवसैरिष्टिकाः सुष्ट्वचैषुः
अग्नीषोमाद्यमालिप्सित पशुमुदितं पर्यषौषुर्न्यहौषुः
सोमं व्यातानिषुस्त्रीननुषवणविधीनृत्विजः कृत्यधीराः

॥ ४३ ॥

तत्र च

प्रागेव व्योमपूर्णास्तदनु सुरवरा यज्ञशालान्तिकान्तम्
व्याकर्षन्तो विमानान् प्रतिहविरवतीर्यागळम् बोभुजानाः
पश्यन्तो विश्वनाथं तदुपचितमहासंपदाडंबरांश्च
श्ळाघं श्ळाघं सकान्तास्त्रिदिवधुतरसा रेमिरे व्योमरंगे
॥ ४४ ॥

सम्यग्भोजनतोऽपि सम्मदमधात् कर्म्मावलीदक्षता-
संप्रेक्षैव ततोऽपि सूरिपरिषत् सारज्ञ चारूक्तयः
सर्वारंभ धुरन्धरस्य तु हरेरानन्दिरूपामृत-
स्यन्दास्वादरसस्ततोऽपि च सतां सर्वोत्तरां निर्वृतिम्
॥ ४५ ॥

सादस्यं कलयन् क्रियासु विमतौ पादावनेजी क्वचि-
न्मञ्जुव्यञ्जनमाहरन्नपरतः शिञ्जान भूषागणम्
उच्छिष्टानि हरन् क्वचित् सुतपसां हेमासनाद्ध्यासितो-
जुष्टः शिष्टजनैः कुतोऽपि ददृशे कृष्णो जगन्नायकः
॥ ४६ ॥

शुभोत्तरैः सर्वत एव सर्वदा
कयापि वृत्या ददृशे जनार्दनः
क्वचित् कदाचित्त्विह मद्ध्यमैर्जनैः
कदापि नीचैः समदर्शि वा न वा ॥ ४७ ॥

गद्यं ॥ १४ ॥

तत्र च सप्तभिर्दिनैः पवित्राग्निष्टोमे निर्वृत्ते पुनरष्टसु दिनेष्वनुमत्यादि तत्तद्देवत्याः पृथग्पृथगिष्टीर्विधाय पञ्चदशेऽह्नि चातुर्मास्य-प्रथमविहितां वैश्वदेवेष्टिमिष्ट्वा प्रतिपद-पौर्णमासेष्टिञ्च निर्वर्त्त्य तदुत्तरेऽह्यन्यारभ्य सुत्रामेन्द्रदेवत्यामंहोमुगीन्द्रदेवत्यां च सन्तनी संज्ञिते इष्टिदिनपर्यायेण पर्यावर्त्तयन् तत्त्द्कालप्राप्तान् इष्टिपशुबन्धाग्रयणादीनपि यथाप्राप्तं सन्तनीकमेव विदधानश्चतुरो मासानतीत्याषाढपौर्णमास्यां सन्तनीपूर्वकं वरुणप्रघासेष्टीं ततः पौर्ण-मासेष्टिमपि प्रविधाय प्राग्वदेव सन्तन्यौ सन्तन्वानः कार्त्तिकमास पौर्णमासीप्राप्तौ साकमेधीष्टि विधायी पुनरपि सन्तनीभ्यामेवातिवृत्ते वत्सरे फाल्गुनपौर्णमास्यामेव प्राप्तायां तस्यां शुनासीरीयेष्टिमिष्ट्वा पुनरपि सप्तदिन्यां सन्तन्यावेव सन्ततान।

गद्यं ॥ १५ ॥

ततः समाप्तेषु सन्तनीदिनेषु पुनरष्टदिवस्यां पृथक् पृथगिष्टिसु कृतासु पूर्णास्त्रयोदशमासाः संप्राप्तश्च विकस्वरपिकस्वरोन्मेषसूचित भावि-महोद्घोषातिरेको द्वितीयो वसन्तारंभः।

गद्यं ॥ १६ ॥

तत्र च प्रतिपद्यमावास्वेष्ट्यनन्तरमारोपिताग्निगर्गरि-ष्टाढंबरं प्रतिष्ठाय वरिष्टतम ब्रह्मगेहमेत्य

कृतबार्हस्पत्येष्टिः स्वगृहमेत्य च सन्तनीमिष्ट्वा पुनरप्येवमेव राजन्यमहिषीसेनान्यादिप्रवरप्रकृतिगृहानेत्य तत्तदिष्टिं कुर्वन् द्वादश दिनानि निनाय।

गद्यं ॥ १७ ॥

ततश्च त्रयोदशदिने मैत्राबाहर्स्पत्यामतिमहती-मिष्टिमतिवाह्य तस्मिन्नेव वळर्क्षपक्षे महितोद्घोष-मभिषेचनीयाख्यं उक्थ्यसंस्थात्मकं सोमयागं समधिकाडंबर मणिकाञ्चनादिनिखिलकलापकरणजाललेलायन्त्यां शालायां अग्निचयनानुगुणक्रियासहितं प्राग्वदेव प्राक्रमत।

अमावास्यादिने सुत्यासिद्धयेऽनुगुणा कृता
तस्यापरिमिता दीक्षा षडेवोपसदोऽभवन् ॥ ४८॥

कुशैः पवं कुंबकुरीरबन्धनम्
कुतोऽपि साशं कुधृतिं च कुर्वति
अकुत्सिताशेषगुणापि पार्षती
कुशब्दयोगं बहुधा गता बत ! ॥ ४९ ॥

प्रतिप्रस्थातुरनुगा सदैवासावसूचयत्
सहानुयानं विपिनं प्रति प्रस्थायिभिः प्रियैः ॥ ५० ॥

भाविद्विषत् क्षोभमिवाभिशङ्क्य-
राजा नवाज्यादृतमूर्तिरासीत्
स्वांगे पुनर्मानितमेखलेऽसौ
दण्ढं तथास्यानुगुणं बभार॥ ५१ ॥

सुमहितकृत्यासंगी
बहुगुणमुख्यं धनञ्जयं राजा
कण्ठे जग्राह तथा
दिग्विजयादागतं यथैव पुरा ॥ ५२ ॥

सदैव भूरिदानेषु मुक्तहस्तोऽपि भूपतिः
बद्धमुष्टिश्च मौनी च दीक्षाकाले किलाभवत् ॥ ५३ ॥

विष्णुक्रमोक्ताचरणैश्च भूयो
धनञ्जयोपस्थितिकर्मणा च
धृतव्रतः सोऽथ निनाय दीक्षाम्
तथैव नेष्यन्निखिलन्निजायुः ॥ ५४ ॥

न दीक्षणीयादिक संस्क्रिया गुणैः
नृपः परं सोमलतामवाप्तवान्
नरात् स[4] यन्मूजवतः समागतात्
समग्रहीत् सोमलतां प्रथीयसीम् ॥ ५५ ॥

राजस्वनेकेषु गुणैर्नृपेन्दोः
क्रीतेषु वश्येष्वपि चर्त्विजोऽमी
शतेन गोभिर्धृत यत्नमेकं
राजानमक्रीणत किं किलैतत् ॥ ५६ ॥

विप्रवर्गैः प्रवर्गैश्च प्रदीप्ता यज्ञवाटिका

[4]Variant text: स्वयं

सत्भिरप्युपसत्भिश्च संगता नितरां बभौ ॥ ५७ ॥

मुख्यः स महावीरः
स्नेहमभिप्रास्य दीपितो बहुभी
अविसोढमहाहवतो
हेतिगणानुत्सृजन्नुदज्वालीत् ॥ ५८ ॥

प्रकटमहल्याजारे-
त्याहूते प्रमुदिते मखोनि तदा
आश्रितपत्नीशाला
गौतमगृहिणीतु सत्रपा नितराम् ॥ ५९ ॥

गद्यं ॥ १८ ॥

तेषु चोपसद्दिनेषु गांगेयलांगलाञ्चित संकर्ष्णविदलित-सन्निवेशायां हस्तिनपुर्यामिव सत्यामुत्तरवेद्यां प्रथमं खलु प्रथनपृथिवीतलमिव समरनिहताश्वपुरुषशीर्षसमाचितम् मुहूर्त्तदूषणमिव अहिमस्तकसमवेतं क्षित्तमण्ढलमिव अधोगत महाकूर्माधिष्ठितं रविमण्ढलमिव अन्तर्गत-हिरण्मय पुरुषं पाण्ढवपुरमिव निखिलप्राणभृद्भिरापूरितं वैयाकरण वाक्यमिव यथोचित योजितविभक्तिकार्यं गगनतलमिवा-श्विनीकृत्तिकादिक्लृप्तौदयं जगदादिवृत्तमिव सृष्टिसन्पन्नविराडान्तस्थ नाकसन्मण्डलं श्रीकृष्णबाल्यमिव यशोदानुगम्यमानं शूर्प्पणखांगमिव विकर्णीकृतसंस्थानं परमान्नमिव घृताक्तबहुशर्क्करोपचितं निर्ग्गुणात्मतत्वमिव नवपुरीषच्छुरितं मद्ध्यस्थ वचनमिव दर्शितोभय पक्षमुख वर्णजालमिव

पञ्चवर्गोदञ्चितं स्वाहादेवीहृदयमिव अग्निप्रणयास्पदीभूतं
भिषग्विचेष्टितमिव दर्शित क्षीरघृतधाराविधानं
अग्निचित्यापदमदीप्यत ।

ऋतिक्प्रयोयुजितनिस्तुषमन्त्रतन्त्र-
निर्घुष्टमिष्टकचितं तदिदं व्यलासीत्
इष्टस्वरूपशिपिविष्टसमुद्दिधीर्षा-
संविष्ट पक्षिवरपृष्ठ गरिष्ठरूपम् ॥ ६० ॥

गद्यं ॥ १९ ॥

तत्र चाग्नीषोमप्रणयनानन्तरमारब्धे
क्रमादग्निषोमीय पशुविधाने ।

एक एव हरिरेष सुत्वनाम्
नथ इत्यभिनयं विवृण्वती
यूपमंगुलिमिवोदनीनमत्
भूश्चषालकलितांगुलीयकम् ॥ ६१ ॥

आश्चर्योऽयं यजनमहिमा यो वधादौ निषेध-
प्रत्याख्यायी प्रबलविधिशक्त्यैव निर्द्धूत दोषः
अग्नीषोमाद्यमरपरितोषोत्थविश्वेशमोद-
न्निश्शेषाघक्षपणनिपुणः श्रेयसां भाति मौलौ ॥ ६२ ॥

गद्यं ॥१९ ॥
ततश्च क्रमादेव देवसूहविर्यजनसहितेऽग्नीषोमीय-
पशुविधाने पर्यवसिते प्रतिदिशं दुन्दुभिलंबनादिषु
च कृतेषु सुत्यादिने प्रस्तुते सत्युक्थ्य संस्थानुगुणं
प्रातःसवनमाग्नेयपश्वनन्तरविहितैन्द्राग्निपशुयुतं व्याततान।

सोमेन पूर्वमुदसूयत राजवंश-
स्तेनास्य निष्कृतिपरा इव यज्ञविज्ञाः
सोमं तदा सुषुविरे वृषचर्मक्लृप्तम्
ग्रावप्रहारनिनदैरभिघौषयन्तः ॥६३ ॥

पुरा हि परिजग्राह सोम एव बुधं सुतम्
तदानीं तु बुधाः सर्वे सुतं सोमं अगृह्णत ॥६४ ॥

अर्थानुस्मृतिगुरुभि-
र्मन्त्रैर्विहितानि साधुकर्माणि
उरुफलजनकान्यासन्
शतपथनयवेदिनस्तदाद्ध्वर्योः ॥६५ ॥

उद्गातृभिः सुविहितेष्वपि सामभेदे-
ष्वासन्नुपद्रवयुता निधनप्रसंगाः
शस्त्रप्रयोगमसृजन् बहुहोतृमुख्याः
संसूचयन्त इव चैद्यरणानुबन्धं ॥६६ ॥

प्रैषप्रयोगो निखिलोऽपि मान्यो

बभूव मैत्रावरुणस्य सर्वैः
नृपात्तदण्डस्य हि तिष्ठतोऽस्य
प्रशास्तृनाम्नो ननु युक्तमेतत् ॥ ६७ ॥

ऋत्विक् चतुर्व्यूह समस्तकर्म-
दृष्टा चतुर्वक्त्र इव स्थितोऽसौ
सम्यग्वितन्वन्मनसैव सर्वम्
ब्रह्मा बभौ कुण्डिकया समेतः ॥ ६८ ॥

अध्वर्युहोत्रादिमनुक्रियैकत-
स्तद् ब्रह्मणो मानसमेव चैकतः
चक्रद्वयेन ह्यमुनाध्वरो रथः
शक्राधिराज्याक्रमणे प्रगल्भते ॥ ६९ ॥

विद्वद्भिरास्तिक्ययुतैरुपास्ति-
विघ्नैश्च तैः संविहितानि तानि
पूर्णांगशोभीन्यतिवीर्यवन्ति
कर्मणि गीर्वाणकलानि चासन् ॥ ७० ॥

राजानं पूर्वमाशीभीरध्वर्युः समवर्द्धयत्
तत् पानमुदितात् पश्चात् सर्वेऽपि त्रिदशोत्तमाः ॥ ७१ ॥

उपगम्य हूयमाने
गृहे सहैवानुदुद्रुवुश्चमसाः

नृपतौ सुवृत्तबहुले
चतुरश्रीभाविता यथा सचिवा ॥ ७२ ॥

ग्रहेषु सर्वेष्वपि भासमानम्
सोमं हि पीयूषरसस्रुतं तम्
हुतं चुचूर्षुर्विबुधा यथेष्टम्
हुतावशिष्टां सममृत्विजोऽपि ॥ ७३ ॥

सोममिह चर्मपूरम्
सुतमपिबन् उदरपूरममरगणाः [5]
यावद्वेदं मोदात्
स्वादुंकारञ्च चरुपुरोडाशैः ॥ ७४ ॥

सोमस्य तूर्णमथ पूर्णतमाः सुरौघाः
सर्वेऽपि भूरि जहृषुर्जहसुः समन्तात्
नेदुश्च केळिसमरानसृजन् नभोऽन्ते
मर्त्योत्सवाच्छतगुणस्त्रिदशोत्सवोऽभूत् ॥ ७५ ॥

अग्नौ च सोमे च सहैव नृत्तम्
प्रकुर्वतोस्तत्र हविष्प्रमोदात्
स्फुलिंगतोयैर्व्यतिकीर्यमाणैः
सिमात् सिमादित्युदगान्निनादः ॥ ७६ ॥

आयान्तु दानवगणाः सममेव सर्वैर्

[5] Variant text: वराः

योत्स्ये छिनन्मि च भिनन्म्यखिलं ददामि
दोर्भ्यां पिनष्मि पृथिवीं च दिवं च नाहम्
सोढास्मि सोममदमित्यनदन्महेन्द्रः ॥ ७७ ॥

गद्यं ॥ २१ ॥ ततश्च समारब्धे माध्यन्दिनसवने सवनभक्षणमुखेषु दाक्षिणहोमेषु च कृतेषु हविष्प्रमोदित सुरवरप्रहित-कामधेनुस्तोमसमकामनीयकहेम मणिगणोज्वलदुस्रासहस्राभिजुष्टया निष्कनिष्कलित बहुपट्टवसनभार पुष्टतर तुरंगम मतंगज गण पुरुषादि लक्षणया दक्षिण दक्षिणतरान् ऋत्विक्जनान् अत्यन्त प्रत्युदयत् प्रमोदभारान् विधाय पुनर्गुण समग्र सकलाग्रिमतम पुरुषयोग्यमुदग्रसामग्र्यां अग्र्यपूजां नृपाग्रेसरः कर्तुमारभत ।

तत्र च

जानन्नप्येष विश्वोत्तरमिह पुरतः सन्तमेकं सभायां
लब्धुं वृद्धानुमत्या निजमति दृढतां प्रौढधीराजमीढः
पूजाविज्ञान निस्संशयमति सहदेवानुयातः सभान्ते
दान्तं शान्तं विरिञ्चप्रतिममभिययौ वैरिभीष्मं स भीष्मं ॥ ७८ ॥

बद्धाञ्जलिस्तदनु भूपतिरेनमूचे
सर्वज्ञ ! शान्तनव ! शान्तनवोथबुद्धे !
प्राप्तोऽग्र्यपूजनविधिः सदसीह को वा

संपूजनीय इति संप्रति मे वदेथाः ॥ ७९ ॥

पृष्टोथ पुष्टविनयेन युधिष्ठिरेण
दृष्ट्वा स दृष्टिवलनैः सुजनानशेषान्
उत्कृष्ट कृष्णमहिमस्मृति हृष्टरोमा
स्पष्टं गरिष्ठतरया गिरया बभाषे ॥ ८० ॥

ज्ञानं वा ज्ञानभाजां बलमपि बलिनां तापसानां तपो वा
यस्यामी भूमलेशाः क्रतुनिगमसुपर्वादि सर्वात्ममूर्तेः
यस्या लाभेन यत्प्रीणनमितिसुधियः कुर्वते सर्व पूजाम्
तं कृष्णं भाग्यलब्धं महय महय भोः किं त्वया चिन्त्यतेऽस्मिन्
॥ ८१ ॥

विश्वात्मनोऽस्य विहिते परिपूजनेऽस्मिन्
विश्वं जगत् ससुरमानवमर्चितं स्यात्
जालप्रभां नमति मूर्च्छति कः पतंगे
श्रौतानले ज्वलति वा जुहुयात् स्फुलिंगे ॥ ८२ ॥

गद्यं ॥ २२ ॥

तत्र च प्रहर्ष बहुमानभारभरिताभ्यां नरदेव सहदेवाभ्यां साञ्जलिबन्धं अत्यादृते शान्तनवशासने ।

हृष्टा बभुवुरखिलाः शिशुपाल मुख्या-

स्त्वासन् परस्परविलोक गभीरभावाः
एकात्मना स्तितमपीह सदस्तदानीम्
द्वेधा विभक्तमिव सूक्ष्मदृशां चकाशे ॥ ८३ ॥

गद्यं ॥ २३ ॥
सहदेवस्तु पुरत एव तां परिषदवयवोन्मिषितां दोषविकृतिं उपशमयन्निव वचनौषधेन किमपि भिषजं चकार ।

शान्तेऽद्य शान्तनववत् बहुविन्न लोके
दृष्टा च पर्षदपि हर्षवतीह कार्ये
सम्मन्तुमर्हथ स मेऽत्र यद्दुप्रबर्हम्
सर्वार्हमर्हयति सम्प्रति भूमिपालः ॥ ८४ ॥

गद्यं ॥ २४ ॥
तदनन्तरमोपान्त एव सभान्तरे विलसन्तं भगवन्तं जगदन्तरात्मानं क्षितिबन्दुरयमतिबन्धुर-विनयमुपगम्य धौम्यगिरा पुरः प्रणनाम ।

कृष्णपादरुचिभिस्तदा नृपः
शोणिमानमनयन्निजं शिरः
तावदेव च स चेदिभूपतिर्-
ल्लोचनाञ्चलममर्ष रोचिषा ॥ ८५ ॥

गद्यं ॥ २५ ॥

तदनु च सहजभक्त्या नकुलसहदेवादि सुहृज्जन-
ससम्भ्रम सम्भृतेषु सकलसंभावनासंभारेषु
दिव्यमणिमय भव्यासन निवेशिते क्लृप्ताभिवादने
दत्ताशिषि च नित्यानन्दमये पुरुषे - ।

भक्त्युद्रेकार्द्रबाष्पद्रुपदनृपसुतापाणिपद्मानुषंगि-
त्वंगद् भृंगारवारा पदनळिनयुगं पुण्यलभ्यं मुरारेः
पाणिभ्यां नेनिजानः सुकृतनिधिरहो शंभुलाळ्यं तदम्भो
मूर्द्ध्ना मूर्द्धाभिषिक्तः सममनुजवधूनन्दनैः सन्दधारः
॥ ८६ ॥

ततश्च

पीतांबरप्रवरभूष्ऽन रत्नजालम्
दिव्यं यदुत्तरकुरूनभिभूय लब्धम्
निश्शेष कोशभरसारतमं ददौ त-
द्विश्वेश्वराय सकलं सजलं स भक्त्या ॥ ८७ ॥

तत्तादृशेन बलिना भुवने समस्ते
न्यस्तेऽपि हस्तभुवि तृप्तिमवाप नैवम्
भक्त्यादरोन्नितिभिरुत्तरळेन राज्ञा
दत्ते यथा स हरिरुत्तम वित्तसारे ॥ ८८ ॥

भूयोऽप्येतावता किं बत भुवनपतेरित्यहो लज्जयेव

स्पष्टं स्वात्मानमेव स्वजनसुतपुरीराष्ट्रकोशादिजुष्टम्
संप्राप्याष्टांगपातं नतवति नृपतौ हन्त भोस्तस्यमौलौ
शौरेश्च स्फारभेरीरवयुतमपतत् पुष्पवृष्टिः सुराणाम्
॥ ८९ ॥

झटिति निपतदानन्दाश्रुरानन्दमूर्ति-
र्नृपतिमधिकभक्त्या मग्नमुत्थाप्य दोर्भ्यां
त्रिभुवनविजयोद्यत् पट्टबन्धाभमस्य-
न्यधित शिरसि शोणं पाणियुग्मं[6] मुरारिः ॥ ९० ॥

गद्यं ॥ २६ ॥

तत्तादृशे तत्र समर्हणे परमपरितृप्तात्मनि
कृष्णाख्ये परमात्मनि सकलजनेष्वपि तन्मुख एव
सम्मोद निर्मग्नदृष्टिषु तन्मयीभूतेष्विव स्तितेषु
जय जय नारायणेति सगद्गदविनिर्गत प्रशस्तिघोषणेषु
ततः समुथाय समुत्तरळगात्रेषु प्रवृत्त नृत्तेषु
समस्त नारदादि मुनिस्तोमेषु नभस्तले च गभस्तिमालिन्यपि
शरच्चन्द्रशीतळायमान भानुविताने सुरप्रवरेषु च
हविष्प्रभोजनतोऽपि भृशप्रमोदमग्नेषु स पाण्डवेषु
च भीष्मविदुरद्रोणादिषु जिन्मातिग ब्रह्मानन्दार्णवमेवावतीर्णेषु
शिशुपालादिष्वपि झटिति हठात् तटिन्निपातमापतित
प्रहर्ष पहर्षक्षणमुषितामर्ष प्रसरेषु इतरमहाजनेषु
च प्रमोदमूर्च्छया मुहूर्त्तमिव स्वात्मनमप्यनवबुद्ध्यमानेषु

[6] Variant text: पाणिपद्मं

समकालमेव च रासातलसौतलवैतलसाप्तसैन्धवद्वैप्य-
द्वैपान्तस्सरसिकान्तर्गुहिक नादेयपौरेयगैरेयवानेयाकाश्य-
सौवादिषु विधिहरविष्णुमुखधिष्ण्यगतेष्वपि जीवकाण्डेष्वकाण्ड एव

किं किमिति सकलेषु यं कमपि
प्रमोदभारमङ्कुरितरोमाञ्चमनुभवत्सु सोषुप्यमाण
प्राणिष्वपि तोषप्रसरविद्रावितनिद्रेषु निवसत्सु
चञ्चूर्यमाण जन्तुष्वपि तृप्तिरसभरात्
सुप्तेष्विवावस्थितेषु स्थावरेस्वपि नवामृतसिक्तेष्विव
सद्यस्समुल्लसित पल्लवदलेषु निर्लक्ष्यमाणेषु
आविरिञ्चमातृणपिपीलिकमखिल भुवनमाप्येकानन्दमयमेतन्मुहूर्ते
पर्यवर्तत ।

गद्यं ॥ २७ ॥

शिशुपालस्तु तमिमं यदुवरस्य वरिवस्योत्सवं निखिलनृपमुनिसूरिमुखेषु-
पारिमुख्यप्रसादं समीक्षं समीक्षं क्रमोत्क्षुभित रूक्षतरा-
मर्षोत्कर्ष भृशतर धर्षितात्मा हरित्राकृत विचित्रमणि-
प्रकाण्डैः सह प्रकामलोहिनीं प्रभां नयनाभ्यामुद्वमन् नृप-
कुञ्जरोन्मुक्तदानतोयैः समं समुन्मिषितघर्मजलोर्मिवर्मितमूर्ति-
रखिलजनहर्षोल्लासहासैः सह गभीराट्टहासमुद्घटयन्
जनसञ्ज्वयरोमाञ्चैः सहाञ्चितमणिपीठपृष्टात् समुत्तिष्ठन्
अर्घ्यानव्याप्तिदुर्भगतरौ करौ निर्भररोषान्निर्भङ्तु काम इव
मुहुर्मुहुरुन्मर्दयन् निर्दय[7] दुर्वादकरणनिर्वेदधरमिवाधरं दन्तपङ्क्तिसन्तोदनैः

[7] Variant text: निर्भय

समुत्साहयन् प्राप्तकालमूर्द्ध्श्वासमिव निश्वासधारया प्रसारयन्
पार्श्वतीयैर्मुखतीयैश्च पौण्ड्रदन्तवक्त्रादि दुर्भूपैस्तद् भाव-
मेवोद्भाव्य समुद्दीप्यमानः समुच्चलतुच्छरोषच्छिन्नाक्षरां
रूक्षतरामाक्षेपवाचमाचचक्षे ।

माद्रेयामरसैन्धवावनिपतीन् कत्रीनिमान् धिक् तमाम्
अत्राग्रीयसमर्हणं धकिदसत्पात्रे च कात्रेयकम्
सूरिम्मन्यतमान् गतनुगतिकान् धिङ् नारदादीन् मुनीन्
येऽमी मोमुदतीह वारिधि निकाय्येऽस्मिन् प्रणाय्येऽर्चिते
॥ ११ ॥

जात्या वा कर्मणा वापि च सकलगुणैर्वर्ज्जितो मुख्यवृत्तेः
भ्रष्टो वा चापि वच्यो न भवति सुधियां किं पुनर्ल्लक्षणीयः
निर्म्मर्यादं सुखं स्वं वहति परम सावप्यनेनैक्यमानी
नश्यत् कर्म्माधिकारो भवति कथमयं निर्गुणः पूजनीयः
॥ १२ ॥

मायामात्रात् जगत्सुन्दरमयति वपुर्वस्तुतोऽसौ विरूपो
गोपीर्व्यामोह्य साद्धीः स्वरतिमुपनयन् लोकबाह्याश्चकार
यो नामाप्यस्य शंसेत् स च खलु परधामाश्रयः स्वान् गृहादीं-
स्त्यक्त्वा भिक्षाचरः स्यात् कथमिव स किलामंगलः पूजनीयः
॥ १३ ॥

यद्वा सिन्धुभुवो जरा प्रलपितैर्मुह्यन्त्वमी पाण्डवाः

कृष्ण त्वं त्वनृपो नृपार्हमहनं हास्यं न किं मन्यसे ?
युक्तो वा सरमापतेरसदृशे भक्तप्रदानेऽप्यहो !
सम्मोदो ननु भूतिलाभमुदितो निष्किञ्चनः खल्वयम्
॥ १४ ॥

भुञ्जानाः साकमेकामगणितगुरवो ब्रह्महन्तुस्तनूजाः
मुण्डा पौत्राश्च रण्डाजठरसमुदिताः पण्डिताः पाण्डुपुत्राः
भ्रूणघ्न्याः सूनुमेनं द्विजनकतनयं भ्रातरं पीतशीथो-
रेनं यन्माननायां जगृहुरिदमलं वर्तते युक्तरूपम्
॥ १५ ॥

धिक् पाण्डुपुत्रचरितं स्थविरप्रमाणम्
बालप्रमाणमपि कष्टमहो विनष्टम्
हे धर्मज! द्रुपदजामपि पृच्छ कार्यम्
नारीप्रमाणमपि तेऽस्त्विह राजतन्त्रम् ॥ १६ ॥

कृष्णश्चेदर्चनीयस्तव किमिति नृपानुत्तमांस्तत्तदर्थे
यत्तानत्राभ्यनैषीः नहि ददिम वयं भीतिहेतोः करं ते
धर्मप्रीत्या च धर्म्यस्त्वमिति चकृपया तत् तु नो मन्यसे त्वम्
धर्मभ्रष्टाभिपूजा विगळितगुणबन्धोऽयमासीन्मखस्ते ॥ १७ ॥

कार्ये कृष्णो यज्ञचिन्तासु कृष्णो
दाने कृष्णः पूजनीयश्च कृष्णः
दृष्ट्वा श्रुत्वा कृष्ण इत्येव सर्वम्

प्रागेवैह त्वत् प्रियायैव सोढम्  ॥ ९८ ॥

बाल्हीकः पार्षतो वा स्थविरक इह चेद् द्रोण एको गुरुश्चेत्
गन्धर्वेशः सखा चेदथ तु बुधवरो व्यास एवार्चनीयः
संबन्धी चेत्स शल्यः प्रहरणनिपुणः कोऽपि चेदेकलव्यो
भो भोः पर्यस्त एव प्रभवति पशुपालैकवर्णे हितं वः ॥ ९९ ॥

एवं तत् पापवर्णैर्मुनिषु पिहितकर्णेषु कन्प्रे जनौघे
पार्थादिष्वात्तरोषार्त्तिषु सवितगतस्वास्त्रदत्तेक्षणेषु
प्रोथायास्थानदेशात् कुमतिरभिमतिग्रन्धिलो बन्धुभिः स्वै-
रन्धः सन्धां बबन्धापि च सुदृढममुं सप्ततन्तुं विहन्तुम् ॥ १००
॥

क्षितिभृन्महिमावलोकतापम्
विफलत्वात् वीगूह्य वर्तनानैः
बहुषु क्षुभितेष्वहर्षि गूढम्
हृदि दुर्योधन कर्णसौभलाद्यैः ॥ १०१ ॥

निर्यान्तं वीक्ष्य चैनं नृपतिरनुगतश्चैद्यः कोऽद्य भ्रमस्ते ?
वृद्धेष्वद्ध्यासितेष्वित्यनुसृतिनिरतः सीन्धुजेनाबभाषे
किं साम्ना भूप ! भूम्ना क्षणमिह शुनकैर्भष्यतां वृष्णिसिंहः
सुप्तोऽद्यैव प्रबोधिष्यति बिभृउरस्मीतत्क्षणे भक्ष्यभावम् ॥ १०२
॥

गद्यं ॥ २८ ॥

इति तदुक्त्या निवृत्ते धरित्रीपतौ कथय कथय
भोः शिशुपालगृहपालभक्षी तव पशुपालसिंहः
कस्कोयमिति न्यक्कररोष विवशवादिनि चेदिपतौ
श्रावय देवव्रत ! तदेव स्वरूपं सकलसमितिजनानिति
क्षितिनाथेनापि नाथितः समक्षमेव लक्ष्यमाणं
जगत्क्षेमहेतुं स्वचक्षुभ्यां आपीय क्षणमिव
निर्मीलिताक्षः साक्षात् स पितामहो मुनिजनमुख्येभ्यो
निशमितं किमिति निगदितुं प्राक्रमत ।

श्रोतुमश्रोतुमप्येतच्चेदिक्ष्मापतिरक्षमः
विवृण्वन् कोपसंरंभान् प्रश्र्ण्वन्नेव तस्थिवान् ॥ १०३ ॥

पूर्णं ब्रह्मैकमेव स्वयमलसदसौ सच्चिदानन्द नादौ
सर्गप्राप्तौ तु मायां पृथगिव विसृजन् बिंबितोऽभूदमुष्याम्
स्वच्छन्दं स्वच्छसत्वप्रकृतिलवसमुद्भूतभूतेन्द्रियत्वा-
दच्छन्नैश्वर्यपूर्णं हरिरिति विदधे चाथ लीलाशरीरम्
॥ १०४ ॥

मायामिश्रात्मनासौ गगनपवनतेजोंबुभूमीवितन्वन्
तत्संयोगाद्यदन्तःकरणफलनतो धातृजीवात्मकोऽभूत्
भूतैः स्रष्टेन्द्रियासूम्स्तनुभुवनमनूत्पाद्यपञ्चीकृतेस्तै-
र्द्धात्रात्मान्यांश्च सृष्ट्वा जयति जगदवन् भुक्तिमुक्तिप्रदोऽयम्
॥ १०५ ॥

एष एव मधुकैटभौ झटिति पाटयन्नकृत मेदिनीम्

पीनमीनवपुरानिनाय खलु दानवेन मुषिताः श्रुतीः
सिन्धुमन्थनधुरन्धरेषु च पुरन्दरादिषु चिरन्तनो
बन्धुरेष किल मन्दरं झटिति सन्दधार कमठात्मना
॥ १०६ ॥

योगीन्द्रादीतशापाज्जयविजयनिजद्वास्थयोर्दैत्यजात्याम्
भूत्वा धूत्वा सुरादीन् जगति विचरतोस्तं कनिष्ठं बलिष्ठम्
दृष्ट्वा धृष्टोष्मकृष्टक्षितिवलयमसौ पोत्रिगात्रो हि धात्रीम्
पोत्रेणोद्धृत्य दैत्यं मृधभुवि कदळीकाण्डखण्डं व्यखाण्डित्
॥ १०७ ॥

एतस्यैव तदग्रजासुरभुजस्तंभाहतात् स्तंभतः
संभूतं न मृगं नमानुषमहो! तत् घोरघोरं वपुः
तप्तस्वर्णसवर्णघूर्णदतिरूक्षाक्षं शशाङ्कप्रभम्
व्यात्तव्याप्तमुखाग्रववल्गिरसनादंष्ट्रायुगोड्डामरम्
॥ १०८ ॥

भूयः संख्यमुखे महासुरममुं प्रोद्गृह्य दोर्भ्यामयम्
द्वारेऽथोरुयुगे निपात्य नखरान् व्युत्खाय वक्षोभुवि
निर्भिन्दन्नधिगर्भनिर्भरगळद्रक्तांबुबद्धोत्सवम्
पायं पायमुद्स्तवान् बहुजगत्संहारिसिम्हारवान्
॥ १०९ ॥

दत्तं ह्यत्र भवेत् तनिष्ठमतिभूयिष्ठं प्रतिप्रक्रिया-
प्यस्याभीष्टदुघैव दृष्टमुभयं त्रैविक्रमप्रक्रमे
बालस्यास्य पदत्रयीवितरणं त्रैलोक्य दानात्मकम्

जातं नाम बलाल्ललास च बलेर्बन्धोऽपि मोक्षावहः
॥ ११० ॥

एष ह्यर्जुनबन्धुरेव भगवान् प्रागर्जुनोद्यद्भुजा-
साहस्रस्रवदास्रविस्रपरशुप्रक्षेपविक्षारितैः
क्षुभ्यत्क्षुद्रतरक्षमापतिघटामासास्थीरक्तच्चटा-
मेदोभिः खलु मेदिनीं पुनरहो ! विन्यास्तदन्यामिव ॥ १११ ॥

लीलातोलितनीलकण्ठशिखरिव्यालक्ष्य दोर्विक्रम-
प्रक्षोभः स हि रक्षसां परिवृढः त्रैलोक्यकालोपमः
एतेनैव निहीनवानरचमूजुष्टेन धृष्टोच्चल-
द्रक्षोलक्षसुरक्षितोऽपि विशिखस्यैकस्य लक्षीकृतः ॥ ११२ ॥

श्रुत्वा तावत्प्रसक्तां जयविजयकथां खिद्यते हृद्यकस्मात्
वीर्योदन्ते हिरण्यासुरदशमुखयोरात्तहर्षोऽयमास्ते
प्रोज्जृंभे नारसिंहे रघुपतिसुमहाविक्रमेऽप्यक्रमोद्यद्-
भीत्क्रोधत्रपान्धो निवसति विकसद्धासनो दामघोषी ॥ ११३ ॥

एष एव निहतप्रलबमधिकप्रलंबभुजभासुरम्
मुष्टिपिष्टखलमुष्टिकं कलित नीलचेलमतिपाण्डरम्
घोरसीरधरमाजियागकृतमागधानिकपराक्रम-
स्थेमहोममतिकोमलं वहति कामपालवपुरन्तिके ॥ ११४ ॥

गद्यं ॥ २८ ॥

अयं पुनः स्ववशीकृतमायस्य श्रेयस्यामीश्वरावस्थायाम्
स्थितस्य निर्मलब्रह्मणः नारायणाख्यस्य
सततप्रकटसर्वज्ञत्वादिसकल निजानुभावः
पूर्ण एव प्रादुर्भावः वासुदेवाख्यः ।

सौहार्दवैरभयरागमुखैः समेषाम्
सद्योविमुक्तिकरणैकधृतत्वरोऽयम्
भूभारहानिरनुषंगकृता तदेनम्
मानन्त्यतीव मुनयः सुखसेवनीयम् ॥ ११५ ॥

गद्यं ॥ २९ ॥

अत एव निरवग्रहानुग्रहत्वरया वैरयोगभाजां
भोजराजादीनां व्योमवादनारदवचनादिना वैर-
दीपनवेगकारी भक्तितुन्दिलनन्दाद्यभिनन्दनत्वरया
पुरतः एव गोकुलयातः पूतनाशकटासुरपवनवत्सकबका-
घमुखानां निधनेनैव निजपदप्रदायी सोपयुक्तस्यानन्तफल-
दायित्वादुत्तमदत्तमपि गोपीनां गोरसादिकमुपयुञ्जानः सर्वथा
मनोविलयनार्थञ्चा क्वचित् बाललीलादिहास्यानि
क्वचिद्विविदास्यलास्यादि करुणास्पदानि, क्वचित्
लोकोत्तर शैलोद्दराण्यनेकात्भुत तराणि
क्वचित् काळियवेष्टादि स्वनिधनयोनि, क्वचित्
अरिष्टकेशिवधादि वीरकर्मणि
क्वचित् भुवनलळितमुरळीगानासारविलास-

विप्रलंभसंभोगादि शृंगाररसतरंगितानि
च विशृंखलीकुर्वन् गोगोपालमृगतृणवीरुदादि
मुक्तिप्रदानायैव च नित्यमरण्यसञ्चरणरसं
प्रपञ्चयन् विरिञ्चवञ्चनबहुरूपविहरणे च
निखिलगोमातृस्नेह प्रसरानात्मगोचरानेव
चिरतरं विरचयन् कदाचित् अखिलगोकुलवासिनां
करतलामलकवत् ब्रह्मानन्दमेव साक्षात्कुर्वन्
यथाकथञ्चिद् गत्यर्हांश्च हस्तिमल्लमल्लवर
कंसपञ्चजनसृगालहंसडिंभिकशतधन्व-
मुरनरकादीनात्मनैव परिहिंसन् अनधिगतस्ववधसुकृतेषु
यवनमगधादिषु चान्तकाले कान्ततरशान्तरूप प्रदर्शनेन
मुक्तिकरवासनाङ्कुरमावपन् अखिल देवाप्सरसामपि संप्रति
संभृत निजसेवया देवत्वान्ते विमुक्तिरस्त्विति यदुनृपस्वदयिता-
रूपेणावतारं प्रागेव प्रचोद्य तत् प्रियानुगुणकल्पितवेषो
नित्यमेव तत्तादृशविनोदैर्मनांसि विलापयन्नमूनेव
मनुजलोकदुरवलोकां निजलोकसंपदमिहैव पृथगनुभावयितुं
जलधिदुर्गकारितद्वारकाख्यदिव्यपुरविहारी गान्दिनेय धनाया
परिपूरणप्रयोजनार्थमेव च स्यमन्तकोदन्तदैन्यमुत्पादयन्
अवश्यानुभाव्य दुरितानुभावेनानपि निरतिशयशुभकरणार्थमेव
पार्थादीनामपि किमपि पीडामपि प्रदर्शयन् स्वतनुपश्य
विश्वजनदुरितनिश्शोषणभक्तवश्यतादि प्रकटनाय च
राजसूयादिकमपि प्रारम्भयन् क्वतिन्मनः प्रेरणेन क्वचिन्नयन-

प्रयोगैः क्वचिन्निजप्रभावप्रकाशनैश्च पुरः प्रज्ञातं परप्रयोजनार्थमेव सकलकर्मलवमपि नर्ममात्रेण निर्मिमाणः निश्चलसच्चिदानन्दांभोधि मात्रधिया त्रिदशोत्तमबुद्ध्या मनुजोत्तमबुद्ध्या च तत्तदधिकारिभिरत्यास्वादित नित्यशुद्ध-सत्त्वमय निष्कळनिर्विशेषमूर्तिरस्मत् सुकृतपाशादिह प्रत्यक्षमेवास्ते ।

भूयोऽपि चास्य बहुखल्वतारकार्य-
मास्ते श्रुतं खलु मया मुनिवर्यवाक्यैः
नैवाधुना प्रकटयामि तदा तदा तम्
पश्यन्तु विश्वजनता भगवद्विलासम् ॥ ११६ ॥

एष एव खलु बद्धबुद्धवपुरुद्धरिष्यति[8] पुरत्रयी
उत्कटोत्कलित कल्किमूर्तिरपि खड्गयिष्यति खलोत्करान्
भूयसा किमयमेव सर्गलयपालनैक रसिकः पुमान्
याज्य एव खलु पूज्य एव नृप योज्य एष हृदि योगिनाम्
॥ ११७ ॥

तद्दुर्विबोधमपि दुर्वचमात्मतत्वम्
हर्षाश्रुसंप्लुतसमाजनिशम्यमानम्
शृण्वन् मुरारिरपि हर्षविकारवेगा-
दात्मस्तुतिस्त्विति निगूह्य कथञ्चिदस्थात् ॥ ११८ ॥

[8]Printed text: विष्यति

चैद्यस्तु वैरिगुणवर्णनकर्णशूल-
तूर्णप्रदीर्ण हृदयोऽधिकपूर्णरोषः
मन्थाद्रिघूर्णितमहार्णववद्विघूर्णन्
प्रोद्गीर्णवान् वचनहालहलं तदापि ॥११९ ॥

प्रादेवाऽसौ विसारः क्वचिदसुरवधे हीन सौकर्यखिन्नः
स्तंभं प्राप्तः कथञ्चिद् व्यदलयापरं सर्वदं तुन्यबद्धात्
मन्यात्मा वीरहत्यां व्यधित निरवधिं स्वस्य दारानदोषा-
नत्याक्षीद्राघवात्मा हरिचरितमहो सर्वमेवाभिरामं ॥१२० ॥

स्त्रीघ्नो गोघ्नो गुरुघ्नः खगफणिभिदधान्नाकमत्रं किलाद्रिं
पर्यास्थद्दारुमात्रं शकटमरमयत् गोपिकागव्यमोषी
ब्रह्मण्यं मागधं तं मुहुरपकृतवांस्तद्भयाद्दाशदेशा-
नातिष्ठद् द्वेष्टि लोकान्मणिममुषदहो स्तौषि दोषानशेषान्
॥१२१ ॥

षण्डत्वात् ब्रह्मचर्यच्छलभृदपनयांभोधिरम्बापहारात्
कं नानर्थं गतोऽभूः सभयमसहथाः गायकाद् भ्रातृघातम्
त्वं भीरुत्वाच्चिरायुर्वससि कपटधर्मोक्तिभिः प्राप्तमानो
रे ! रे ! मिथ्योद्य ! चैद्यस्त्विह न हरिकथाभीषिकाबिर्बिभेति
॥१२२ ॥

रे! रे! वर्षिष्ठ ! तिष्ठत्विह यदुकुहकश्ळाघिका मोघिका ते
गच्छ स्वच्छन्दमृत्युब्रुव समरभुवं खाद्यसे चैद्यबाणैः

जूर्णे वा चूर्णलज्जैस्त्वयि किमिषुगणईराह्वयेऽहं त्वसाहान्
पार्थाः सार्द्धं स्वकैर्मां रिपुमथनधनुर्द्धारयं वारयन्तु ॥१२३ ॥

गद्यं ॥३० ॥

इत्थं कारमदमघोषप्रसविनि दमघोषप्रसवे सभाङ्कणसंगिनि च तुंगरोषभंगुरभ्रूकटीके भंगाकटभंगावहनयनपैंगलीजूषि लांगलपाणौ जांगलिकोऽस्म्यहमेव सुनीथभुजंगमस्येति लांगलमुद्वहति स्वांगतरंगितरोषविकारेषु च गांगायनिप्रभृतिषु रथांगपाणौ च शशांकधवळस्मितांकराङ्कितमुखे निरादर एव स्थितवति भृशाक्षमेषु च प्रतीक्षित तदाहान्वेषमेव स्थितेषु व्याप्तरोषतात्वर्यमाण सात्यकियुतेषु रणशौण्डभुजदण्डप्रकाण्ड ताण्डवित गाण्दीवादिहेतिषु पाण्डववीरेषु रोषचण्डिमखण्डितसन्देहेषु सममेवोत्थितेष्वप्युग्र-कोपादग्रतस्सरो निर्गळद्विष्फुलिंगनयनोदारो वृकोदरो गगनाट्टगट्टननिष्ठुराणि त्रिचतुराणि गर्जितानि निर्जयन्नर्जुन धनुर्ज्यागर्जितैः सममुद्ववाम वाणीं ।

चेदीशानां शतं वा प्रसरतु पुरतो दन्तवक्त्रा सहस्रम्
काशीशा पौण्ड्रका अप्ययुतमयमयं जृंभते भीमसेनः
ये ये कृष्णार्चनायामसहनमनसस्तोकिलैकैकशोऽद्य
प्रोद्यद्दोर्दण्डचण्डभ्रमितगुरुगदाघोरघातान् सहन्ताम् ॥१२४ ॥

गद्यं ॥ ३१ ॥

इति परिरटिनं साटोपसमुत्पतिष्णुमधिकासहिष्णु-
मखिलाभिभूष्णुगदाविभ्रान्तिविभ्राजिष्णुम्
जिष्णुज्याया समेनं द्वित्रैः पदैरिव चैयमूर्द्धान-
मधिरोक्ष्यन्तमभिवीक्ष्य पीठिकोत्थायं समुत्थाय
हस्तग्राहमभिगृह्णन् जह्नुजासूनुरन्वगादीत्।

दोर्भिर्नेत्रैश्च पूर्वं हरिहरसदृशं त्यक्तमैच्छत् पितामुम्
कस्यापङ्के विजह्यात्तनुविकृतिमसावस्य हन्ता स एव
इत्यभ्रोत्तयाङ्ग्तोपागतनृपतिजनाङ्केषु मात्रार्पितोऽयम्
वर्द्धिर्ष्णुर्मातृवीक्षागतयदुवृषभस्याङ्कतोऽभूद् गताङ्कः
॥ १२५ ॥

आगः सहस्वेति वृतो जनन्या
कृष्णः शतागस्सहनं न्यगादीत्
तेनान्यनिर्भीतिरसौ खलोऽस्मा-
नाह्वास्त भोः क्षाम्य परामिषे त्वम् ॥ १२६ ॥

गद्यं ॥ ३२ ॥

इथमुक्ते हस्तधृते च कथञ्चित् तस्थुषि
दुःसहज्वलितभामे भीमे ।

उच्चैरूचे स्वमर्मप्रकटनकटुकक्रोधबाधः सुनिथो

रे ! रे ! कृष्ण ! त्वमागः सहसि किल वयं त्वामिषत्वं गतास्ते

एह्येहि क्षुद्र ! लज्जाविकल ! चपल ! गोपाल ! भूपालमानिन् !

दक्षश्चेद्रक्ष दक्षक्रतुमिव गिरिशो निर्द्धुनोम्यद्धुरं ते ॥ १२७ ॥

गद्यं ॥ ३३ ॥

इति वादिन्येव चण्डभुजदण्डकुण्दलित कोदण्डेऽपि सन्तेजित शरकाण्डैः खण्डयितुमेव

पाण्डवयज्ञशालां प्रत्यापतति पापिष्ठचेतसि

चेदिश्रेष्ठे भूसुरजालकेषु च भीलुकेष्वाशयाभिज्ञ

दारुकपूर्वसज्जितमेव निभृतनिहितं रथप्रवरं

लघुप्रपातमारूढः तटित्प्रकाशमिळितनवप्रळयांबुद-

प्रतिमतेजाः दृढप्रकृष्टधनुष्प्रकाण्ड-

मण्डलान्तर्गतो रिपुप्रतिमुखमेव ददृशे मुरप्रमाथी ।

तदस्तु चेदिभूमिभृत् सुहृत्त्वदत्तचेतसः

समस्तदुष्टभूपतीनभिप्रचार्य संहतान्

जगत्त्रयेश्वरः स्वयं निवर्त्य चापवल्लरीम्

घनप्रणादसोदरीं किमप्युवाच भारतीम् ॥ १२८ ॥

गद्यं ॥ ३४ ॥

भो! भो! सज्जनव्यसनसज्जनाच्चिरादेव जयपद-वीच्युतो मयि नित्यवैरितया मदभेदयोग्योऽयं

चेदिराजः ।

चिद्रेऽधाक्षीत् पुरीं मे यदुगणमहरद्दैवताद् बभ्रुपत्नीम्
जह्रेऽमुष्णान्मखाश्वं मयि मगधसुतार्थे च किं किं न चक्रे
दुर्वादाः सर्वलोकैरिह च निशमिताः यन्नबाधे शतागः
पूर्णोऽयं तूर्णमस्मादपसरत नृपाः घूर्णितं मे रथांगम् ॥१२९ ॥

इति निशम्य निशाम्य च शार्ङ्गिणः
प्रतिघभारतरंगितम्मिंगितम्
स्वगतिकालमनाप्य भियाप्यलम्
क्षिभृतः सबलाः प्रपलायिताः ॥१३० ॥

यान्तु यान्तु किमभीभिरद्य मम कातरैर्मृतिभयातुरै-
रेक एव पुनरीश्वरोऽस्मि ननु गोपसूनुघटनाविधौ
इत्युदीर्य भृशतिग्मधारमिह रुक्मिणीकुचपदाङ्किते
माधवोरसि शरं किरन् गरकिरं गिरं च पुनराददे ॥१३१ ॥

भोः! भोः! गोपवटं हठान्मम वधूचोरं बलादीनमून्
कृत्स्नान् पाण्डवखेटकनापि मखं चामुं सुखन् चूर्णयन्
बद्धे युद्धमाहाद्धुरेऽत्र हि जरासन्धस्य बन्धोरहम्
स्कन्धावारधुरन्धरोऽद्य वितनोम्यानृण्यमाकर्ण्यताम् ॥१३२ ॥

अन्योन्यच्छन्नगात्रध्वजरथमिषुभिस्तत्क्षणं निष्प्रयास-
प्रास्तापास्ताखिलास्त्रत्रसभुवनमदृष्टश्रुतं नारदाद्यैः
चैद्येनोद्यत्प्रकोपप्रतिभयवदनं शौरिणा स्मेरवक्त्रम्

हंहो! किं किं न चित्रं निरघटि घटिकामात्रतः शात्रवाभ्याम्
॥ १३३ ॥

गद्यं ॥ ३५ ॥

ततस्तु नमोऽस्तु भगवन्! बाध्यतां न माध्यन्दिनसवन-
वेला तव लीलारसैरिति दारुकेणापि दारुणशरविदारितेन
धीरतां विहाय वरितः शौरिरेनमारचित चारुस्मितमीरयति स्म ।

पूर्वं घोरनखाङ्कुशैरथ शराङ्कूरैः कृताङ्को मया
दत्तद्वेषवरः स चेदिभृदसौ मङ्गृत्यमुख्यो जयः
पश्यन्त्वस्य बलं जना इति मया यत् किञ्चिदुत्क्रीडितं
यच्छाम्यद्य मनोरथं पृथुमहश्चक्राय चक्राय मे ॥ १३४ ॥

आरोक्ष्यामि तवांगमात्ममहसा रे कृष्ण कृष्णेत्यलं
क्षिप्तेषोद्विषतः सुदर्शनमसौ दुर्द्दर्शनं प्रोद्वहन्
उच्चैर्द्धर्मपथो जयत्विति वदन्मार्त्ताण्ड चण्डत्विषा
तेनाकुण्ठजवं चखण्ड कुमतेः कण्ठं विकुण्ठेश्वरः ॥ १३५ ॥

जन्मत्रय्यात्तविष्णुस्मरणबलसमुद्बूद्धचिद्धामदीप्तम्
बुद्ध्याद्यं चैद्यदेहादुदितमुरुमहौरूपि सूक्ष्मं शरीरम्
कृष्णं प्राविक्षदालक्षितमखिलजनैः सर्वकामाढ्यपूर्ण-
ब्रह्मानन्दं स भेजे परम सगुणसायूज्यमावृत्तिहीनम् ॥ १३६ ॥

हृष्टैः सुरैः कुसुमवृष्टिरमोचि कृष्णे
तुष्टाः समे जय जयेति जना विनेदुः

दष्टाधरोष्ठमपि पिष्टकरं क्षणार्द्धम्
द्रुष्टाः स्तिता अपि भियैव पुनन्न्र्न्ननद्रुः ॥१३७ ॥

एवं चैद्ये तमाद्यं पुरुषमुपगते तत्सुतं न्यस्य राज्ये
निर्मास्यन् कर्मशेषं नृपतिरयमुपानीय दानीयलोकान्
वित्तैः स्वस्यैव हस्त्यैः मणिगणगुरुभिर्द्रौणिपात्रप्रणितैः
कर्णोकीर्णैश्च पूर्णानाकुरुत निखिलान् वित्तपप्र्त्यनीकान् ॥१३८ ॥

रत्नाग्र्यस्वर्णकन्यावसनपशुघटाधानभूषादि यद्य-
द्यस्येष्टं यच्च धर्त्तुं क्षममखिलमिदं राज्ञि भेदीयमाने
कालेनाशेषकामप्रतिहतिरवधिं हन्तकारेष्वकार्षीत्
गृह्णीतायातपूर्णं तनु कुरु भवनादीति घोषो निरैषीत् ॥ १३९ ॥

गद्यं ॥ ३५ ॥

ततः क्रमेण निवृत्ते मरुत्वतीयग्रह त्रितयहोमे दिव्यदुकूलजालोल्लसितोल्लोचादिवेल्लिते शालाप्राग्विभागे गृहीतकोदण्डशरकाण्डस्य राजशार्द्दूलस्य शार्दूलचर्मास्तरणासीनस्य सर्वौषधादिभिरमिताघोषमभिषेककर्म निर्माय समभिषिक्तोऽयं युधिष्ठिरः पाण्डुसूनुरिति समुद्घोषयाञ्चक्रुः।

पुरस्तादभिषेकस्य परस्ताच्च कृतास्तदा

पार्थहोमास्तु पार्थस्य यज्ञे सार्थकतां ययुः ॥ १४० ॥

बाहुः पृथ्वीभरणाद्वराहकृत्यादृतः सदा नृपतेः
अवहदिह पादुकामयवराहकृत्यादरं स पादोऽपि ॥ १४१ ॥

माहेन्द्रस्तुतशस्त्रप्रयोग परिशोभितेऽथ समितितले
देवासुरसमरसमं समरमकुर्वन् प्रधाव्य वीरवराः ॥ १४२ ॥

संग्रामढंबरविधाविह दुन्दुभीन-
प्याजघ्नुरुग्ररवजृंभितकन्पिताशाः
चक्रुश्च वादचतुराः सदसि प्रकामम्
तर्कादि पक्षशतसाधनबाधनानि ॥ १४३ ॥

अग्नीध्रपश्चिमोद्य-
न्मणिभवने संस्थितोऽयमासन्द्याम्
सूतादिप्रकृतिवरै-
र्देवनमतितिष्ठ काञ्चनैरक्षैः ॥ १४४ ॥

गद्यं ॥ ३७ ॥

ततश्च नरकेसरिणेव हिरण्यकशिपुमाक्रम्यासीने
होत्रा वेदभागगदितमेव शौनश्शेपमाख्यानमाख्यायन्
विहितसरण्या हिरण्यासनगोसहस्रमयीञ्चान
दक्षिणां दत्वा माहेन्द्रग्रहदक्षिणादि नीत्या साध्वे
माद्ध्यन्दिनसवनमासमाप्यत ।

त्रितीयसवने तावत् सोमग्रहसमुद्यमे
हन्तादित्यग्रहोऽप्यासीत् तूर्ष्णीं ज्योतिर्विदोऽभवन् ॥ १४५व्
॥

गद्यं ॥ ३८ ॥

ततस्त्रितीयसननेऽपि संभृते महिताघोष संभृतावबभृथोदयनीय मैत्रावरुणीषु कृतासु गृहान्तरमासाद्योदवसानीयेष्ट्यवसाने निखिलाभरणादि परिकरभूषितस्य महाराजस्य महढंबरविजृंभितः पुनरभिषेकोऽपि विघोषितोऽभूत् ।

गद्यं ॥ ३९ ॥

एवं चैत्रमाससमाप्तां समाप्तेऽभिषचनीये तत्रैव सद्मनि कृतामावास्येष्टिः पुनराग्नेयीमिष्टिमन्वतिष्टत् ।

गद्यं ॥ ४० ॥

तदुत्तरदिने तद्गृहात् पुरस्तात् षट्सु शम्याप्रासप्रदेशेषु प्रतिदिनं पृथग् पृथग् इष्टीर्विधायां सप्तमदिने सप्तशम्याप्रासप्रदेशे प्रागेव प्रतिष्ठितां महाभोगशालिनीं शालामष्टमीतिथौ प्रविष्टो यष्टातस्यां दशपेयाख्यमेकदीक्षादीनारब्धं त्रिदिनोपस्तकं चतुर्थदिनसुत्यमग्निष्टोमसंस्थं सोमयागं प्रथमकथित प्रक्रिययैव प्रक्रमते स्म ।

यद्दीक्षादिवसे बिबर्त्ति नृपतिः सत् पुण्डरीकस्रजम्
प्राजापत्य कुतूवरश्च सवने कायश्च यस्मिन् पशुः
सोमं यत्र च भक्षयन्ति चमसान् हूत्वाशनं ब्राह्मणः
यस्मिन् वा मणिदर्पणद्वितयमप्यद्धुर्यवे दक्षिणाम्
॥ १४६ ॥

गद्यं ॥ ४१ ॥

ईदृशस्य चतुर्दिननिर्वत्यत्वादहर्द्दिवं निर्विश्रमस्य महाभोगमहनीयस्य दशपेयक्रतोरन्ते कृतश्मश्रुमात्रवपनो मेदिनीपतिर्द्वादशतिथाववेष्टिं नामेष्टिं पञ्चहविष्कां अनुष्ठाय तद्दूर्द्धोऽहन्यादित्यमारुतच्छागीद्वयवन्तं पशुवन्तं अप्युपसन्तेने ।

गद्यं ॥ ४२ ॥

ततः चतुर्द्दश्यां पूषादिदेवत्यां पञ्चदश्यां च पूर्वप्र्युगाख्यमिष्टिमिष्ट्वा कृतपौर्णमास्येष्टिरुत्तरेऽहन्युत्तरप्रयुगाख्यामपि कृत्वा पुनर्द्वादशदिन्यां च जन्यार्थिनां जन्यप्रदानसन्नद्धो धृतवृत एव ववृते ।

नाभविष्यदिह चे[9]ज्जनार्दनो
नामरिष्यदथवा स चेदिराट्
आपतिष्यदधुनात्र संगरो

[9]Variant text: वा

घोर इत्यनुशुशोच नारदः ॥१४७ ॥

ततो वसन्तान्तिमदर्श आगते
तिस्रस्तदा दक्षिणमद्ध्यमोत्तराः
शाला व्यदृश्यन्तकृता महाप्रभाः
पुरो यथा पावकशक्रशूलिना ॥१४८ ॥

गद्यं ॥४३ ॥

तासु च दक्षिणशालां प्रविश्यापरमितत्वविधेः द्वित्रिदिनमात्रदीक्षाद्द्वादशोपसदमासन्नपौर्णमासि-व्यवस्थितसुत्याप्रयोगमतिरात्रसंस्थात्मकं केशवपनीयं नाम सोमयागं कृत्वा तदवसानकृत-केशादिकृत्स्नलोमवपनो बभूव भूमिपालः ।

दीक्षाक्रमो मिळदुखाभरणः पुरोव-
द्दीक्षावधौ क्रयविधिश्चयनं तु सर्वम्
कार्यं प्रवर्ग्यदिवसेषु पशुस्तदन्ते
सुत्या तदूर्द्ध्वमिति सर्वमखे समानम् ॥१४९ ॥

गद्यं ॥४४ ॥

एवं ग्रीष्माद्यवळक्षपक्षे गते मद्ध्यमशाला-मद्ध्याविश्य पक्षत्रयनिवर्तनीयं व्युष्टिद्विरात्राख्य-महीन महीनाभोगं सोमयागमारभत ।

गद्यं ॥४५ ॥

सोऽप्यपरिमितदीक्षाविधानात्त्रिंशद्दिन-
प्रायदीक्षावानहीनत्वान्नियतद्वादशोपसत्को
ग्रीष्मावसान चतुर्द्दशीपञ्चदर्शी
व्यवस्थिताग्निष्टोमातिरात्र संस्थात्मक
सुत्यात्मकदिनद्वयविद्योतमानसमुद्य-
दवभृदादि घोषसमाप्तिं ययौ ।

गद्यं ॥ ४६ ॥

तत्र श्रावणमासाग्रिम पक्षपक्षतेः
परमक्षताभोगामुत्तरशालां प्रत्युपेत्य
क्षत्रस्य धृतिर्नामाग्निष्टोमं त्रिदिनदीक्षं
त्रिदिनोपसत्कं सप्तमदिनसुत्यमत्यन्तः
प्रोद्घोषितावभृतं प्राथमिकरीत्या
प्रातनुत ।

गद्यं ॥ ४७ ॥

तदस्तदुत्तरदिनैः पूर्वदेविकेष्टिमुत्तरदेविकेष्टिं
त्रैधातवीयामप्याधाय पक्षशेषेण
पशुत्रियसुराग्रहादि व्याप्तामात्तावघोषावभृथ-
यात्रां सौत्रामणीमप्यतिवाह्य श्रावणमासपूर्व
पक्षान्ते राजसूयमहाक्रतुमतिक्रमयाञ्चक्रे ।

गंगायां तुंगरंगत् पटहपटुरवं संगतानन्दभूभृद्-
भूषाशस्त्रौघतेजः कपिशदशदिशं विस्मिताशेषलोकम्
व्योमान्ते पाण्डुनापि प्रमदभरगळद्बाष्पमालोक्यमानम्

चक्रे शक्रातिगश्रीरतुलमवभृथाघोषमन्त्यं नरेन्द्रः
॥ १५० ॥

दिवाद्धरावभृथपूततमे द्युनद्या-
स्तोये ममज्ज हरिणा सहसर्वलोकः
आपाण्डुपाण्डुसुतकीर्तिपयः पयौधौ
तावच्चदुर्दशजगन्त्यपि पर्यमाङ्क्षुः ॥ १५१ ॥

निर्वर्त्यावभृथं महोज्ज्वलमहाः कृष्णासखो राजरा-
डुत्तीर्णः सुरवृन्दकीर्णसुमनः संभारसंभावितः
कृष्णाभ्यां धृतचारुचामरमणिच्छत्रो धरित्रीभृताम्
सार्थैः सार्द्धमगाद्विशेषविहितालङ्कारतुंगां पुरीम्
॥ १५२ ॥

निर्वृत्ते सप्ततन्तौ सुमहितविभवे निर्वृते सर्वदेव-
व्राते निर्व्यूढकृत्यो नृपतिरथ समाहूय निश्शेषलोकान्
बुद्धोर्द्धं धार्तराष्ट्रच्छलमतिमधुनैवाहमुद्धूळयिष्ये
वित्तौघानित्यभीप्सन्निव मणिकनकं मेघवर्षं ववर्ष
॥ १५३ ॥

दिग्भ्यो बलाहृतमनन्त धनप्रपञ्चम्
तत्रैव वर्तयितुकाम इवावनीन्द्रः
तत्तद्दिशं गमिषु सर्वजनेषु किं किं
कस्मै ववर्ष न सहर्षमधर्षितोष्मा ॥ १५४ ॥

नो देहेषु ममुर्विभूषणगणाः गेहेषु नार्थावली

नैवाश्चर्यरसानुभूतलहरी चित्तेषु वा देहिनाम्
आविप्रं पुनरान्त्यजाति निखिलं मानुष्यकं तत्क्षणात्
भूपप्रत्त दुकूलकाञ्चनमणिव्याप्ता सुदीप्तं बभौ
॥ १५५ ॥

दद्मो दद्मो धनाळिं [10] नरवरतिलकायेति सर्वे नरेन्द्राः
सर्वं संपूरयामो द्विजमुखजनतास्वित्यमी पाण्डवेयाः
एवं स्पर्द्धानुबन्धे महति सति [11] जयं जानते केवलं ते
पूर्णोद्गीर्णोरुरत्नज्वलदररमुखाः कोशगेहप्रदेशाः
॥ १५६ ॥

एवं निस्सीमहृष्यन्मुनिसुरमनुजाशीर्भिरुद्घोषिताशः [12]
प्रस्तानप्रत्तपुष्यद्धनगृहनगरक्षेत्रपात्रादि भारम्
स्वर्णापूर्णावकीर्णव्रजदुरुजनताकाञ्चनीभूतविश्वम्
चित्रं निव्रर्त्यं तत्र क्रतुवरमतुलं धर्मराजो विरेजे
॥ १५७ ॥

एतावन्मत्कृपायाः खलुविलसितमित्युच्चकैर्द्दर्शयित्वा
विश्वानन्दाभिवर्षी पुनरपि वसतिं प्रार्थ्यमानोपि पार्थैः
दैवाद् भाविन्यवस्था मयि सविधगते मास्तितीवात्तचेताः
चैद्यारिः सौभरुद्धां सपदि निजपुरीमश्वयीद्विश्वसाक्षी
॥ १५८ ॥

[10] Variant text: धनाळीः
[11] Variant text: जयं केवलं जानुते ते
[12] Variant text: ताशम्